THE

CHOWKHAMBÂ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 331.

कमलाकरभट्टविरचितो-

निर्णयसिन्धुः

कृष्णंभट्टकृतव्याख्यासहितः ।

श्रीधर्माधिकारिपाठशालायां प्रधानाध्यापकेन श्रीयुत पं० व्याकरणोपाध्याय नेने—इत्युपाख्यगोपालशास्त्रिणा तदीयगुरुवर म० म० पं० पर्वतीयनित्यानन्द-पन्तप्रदर्शितरीतिमनुसृत्य संशोधितो टिप्पण्या परिष्कृतश्च ।

NIRNAYA SINDHU;

of Kamalakara Bhatta

With Commentary of Krishnam Bhatta.

Edited With Notes by Vyakaranopadhyaya Gopala shastri Nene.

FASCICULUS XIII—१३.

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.

AGENTS: PANDITA JYESHTHÂRAMA MUKUNDAJI, BOMBAY:
OTTO HARRASSOWITZ, LEIPZIG: GERMANY.

Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1925.

Registered According to Act XXV of 1867 (All Rights Reserved.)

यक्षकर्दम इत्येष सर्वदेवमनोहरः ।
कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा ॥
कङ्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः ।

यस्तु—

दारिद्र्यं पञ्चकं कुर्यादस्वास्थ्यं रक्तचन्दनम् ।
उशीरं विप्रविभ्रंशमन्ये कुर्युरुपद्रवम् ॥

इति निषेधः, स केवलपरः;

चन्दनागुरुकर्पूरकुङ्कुमोशीरपङ्कैः ।
अनुलिप्तो हरिर्भक्त्या वरान्भोगान्प्रयच्छति ॥

इति आग्नेये मिलितानां विधानात् । स्कान्दे—

चन्दनागुरुकर्पूरपङ्कं गन्धमिहोच्यते ।
चन्दनागुरुकर्पूरचोर कुङ्कुमरोचना ॥
जटामांसी कपियुता शक्तिगन्धाष्टकं मतम् ।

चोरः कचोरः ।

चन्दनागुरुह्रीबेरकुष्ठकुङ्कुमसेव्यकाः ।
जटामांसी मुरमिति विष्णोर्गन्धाष्टकं मतम् ॥
चन्दनागुरुकर्पूरतमालजलकुङ्कुमम् ।
कु(१)सीतं कोष्ठसंयुक्तं शैवगन्धाष्टकं मतम् ॥

शिवार्चनचन्द्रिकायां—

ह्रीबेरं चन्दनं कुष्ठमगुरुं कुङ्कुमं मुरम् ।
सेव्यकं च जटामांसी वैष्णवं तदुदीरितम् ॥

जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनम् ।
तमालागुरुकर्पूरैः शाम्भवं चाष्टगन्धकम् ॥

चन्दनागुरुकर्पूरैः केसरै रोचनान्वितैः ।
सशिल्लकजटामांसीसटीभिः शक्तिसम्भवम् ॥

---

(१) 'कुसीतं कोष्णसंयुक्तं' ख०

स्कान्दे—

यो ददाति हरेर्नित्यं तुलसीकाष्ठचन्दनम् ।
युगानि वसते स्वर्गे ह्यनन्तानि नरोत्तमः ॥
तुलसीदललग्नेन चन्दनेन जनार्दनम् ।
विले(१)पयेत्तु यो नित्यं लभते चिन्तितं फलम् ॥

गणपतिकल्पे—

शङ्खपात्रस्थितं गन्धं मन्त्रैर्दद्यात्कनिष्ठया । इति ।

अथ पुष्पम्—

शुद्धकाञ्चनपुष्पाणि रत्नमुक्ताफलान्यपि ।
सर्वाणि तुलसीपत्रकलां नार्हन्ति षोडशीम् ॥
उत्तमं तुलसीपुष्पं मध्यमं तुलसीदलम् ।
अधमं तुलसीपत्रं काष्ठचूर्णं ततोऽधमम् ॥
तुलसीमञ्जरीमालां विष्णवे यो निवेदयेत् ।
शालग्रामशिला येन पूजिता तुलसीदलैः ॥
स पारिजातमालाभिः पूज्यते सुरसद्मनि ।
श्यामापि तुलसी विष्णोः प्रिया गौरी विशेषतः ॥
तुलस्यौ पङ्कजे जात्यौ केतक्यौ करवीरकौ ।
शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च ॥
उत्पलानि च नीलानि कह्लारकुसुमानि च ।
मालतीकुन्दमन्दारनन्दावर्त्तादिकान्यपि ॥

पुष्पाध्यायादिग्रन्थान्तरे विस्तरः ।

अथ धूपः—

शर्करस्याथवा विष्णोर्घृतयुक्तं च गुग्गुलम् ।
दद्याद्भक्त्या नरो यस्तु सर्वपापैः स (२)मुच्यते ॥

हारीतः—

रुहिकाक्षकणं दारुः सिल्हकं सागुरुं सितम् ।
शङ्खं जातीफलं श्रीगः प्रिया धूपा हरेरिमे ॥

---

(१) 'विलेपयति यो' ङ० (२) 'प्रमुच्यते' ङ०

रुहिका मांसी, कणो गुग्गुलभेदः, दारुः देवदारुः, सिल्हकं तुरुष्कं, सितः कर्पूरः, शङ्खं नखं, श्रीगश्चन्दनम्।

विना मृगमदं धूपे जीवजातं विवर्जयेत्।
महिषाख्यं गुग्गुलं च आज्ययुक्तं सशर्करम्॥
धूपं ददाति राजेन्द्र नरसिंहाय भक्तिमान्।
कृष्णागुरुसमुत्थेन धूपेन श्रीधरालयम्॥
धूपयेद्वैष्णवो यस्तु स मुक्तो नरकार्णवात्।

भविष्ये—

अगुरुं चन्दनं मुस्ता सिल्हकं वृषणं तथा।
समभागं तु कर्त्तव्यं धूपोऽयममृताह्वयः॥
श्रीखण्डग्रन्थिसहितमगुरुं सिल्हकं तथा।
मुस्ता तथेन्दुर्भूतेश शर्करा च दहेत्त्यहम्॥
कृष्णागुरुं सिल्हकं च बालवं वृषणं तथा।
चन्दनं तगरं मुस्ता प्रबोधः शर्करान्वितः॥
कर्पूरं चन्दनं कुष्ठमुशीरं सिल्हकं तथा।
ग्रन्थिकं वृषणं भीमं कुङ्कुमं गृञ्जनं तथा॥
हरीतकी तथोशीरं यक्षधूप उदाहृतः।
वृषणं सिल्हकं बिल्वं श्रीखण्डमगुरुं तथा॥
कर्पूरं च तथा मुस्ता शर्करा सत्वचा द्विज।
इत्येष विजयो धूपः स्वयं देवेन निर्मितः॥
मधु मुस्ता घृतं गन्धो गुग्गुल्वगुरुशैलजम्।
सरलं सिद्धसिद्धार्था दशाङ्गो धूप उच्यते॥

मदनरत्ने—

त्रिभागकुष्ठो द्विगुणो गुडश्च लाक्षात्रयं पञ्च नखस्य भागाः।
हरीतकी सर्जरसश्च मांसी भागैकमेकं त्वथ शैलजस्य॥
घृतस्य चत्वारि पुरस्य चैकं धूपो दशाङ्गः कथितो मुनीन्द्रैः।
गन्धो मुस्ता, पुरो गुग्गुलुः।

चन्द्रिकायां—

घृतस्य व्यजनेनैव धूपेनाङ्गविधूपने ।
नीराञ्जनेषु सर्वेषु विष्णोर्नामानि कीर्तयेत् ॥

मारसिंहे—

घृतेन वाथ तैलेन दीपं प्रज्वालयेन्नरः ।

तिलोद्भवं तैलम् । स्मृत्यर्थसारे—

नैवेद्यार्थं पृथक् भाण्डे स्नाता पत्नी पचेत्तथा ।
वैश्वदेवार्थमन्यस्मिन्व्यञ्जनानि पृथक् पृथक् ॥ इति ।
दरिद्रश्चेत्स्वभोज्यं यत्तदीशाय निवेदयेत् ।
अनिवेद्य हरे भुञ्जन्सप्त जन्मानि नारकी ॥

पाद्मे—

हविः शाल्योदनं दिव्यमाज्ययुक्तं सशर्करम् ।
नैवेद्यं देवदेवाय यावकं पायसं तथा ॥
यावद्भक्ष्यं भवेत्पुंसस्तावद्देयं जनार्दने ।
नैवेद्यवस्त्वलाभे तु तोयान्यपि निवेदयेत् ॥

सारे—

(१)मण्डले चतुरस्रे तु पात्रं संस्थाप्य यत्नतः ।
अस्त्रमन्त्रेण संप्रोक्ष्य चक्रमुद्राभिरक्षितम् ॥
धेनुमुद्रां प्रदर्श्याथ गन्धपुष्पैः प्रपूज्य च ।
देवे पुष्पाञ्जलिं दत्त्वा मन्त्रमेतमुदीरयेत् ॥
हेमपात्रस्थितं दिव्यं परमान्नं सुसंस्कृतम् ।
पञ्चधा षड्रसोपेतं गृहाणेमं सुसिद्धये ॥ इति ।

वैदिकमन्त्राभावेऽयं बोध्यः ।

प्रक्षिप्य तुलसीं प्रोक्ष्य वामाङ्गुष्ठेन संस्पृशेत् ॥

अत्र ग्रासमुद्रा दक्षिणेन कार्या । अथवा—

ग्रासमुद्रां वामदोष्णा विकचोत्पलसन्निभाम् ।
प्रदर्शयन् दक्षिणेन प्राणादीनां च दर्शयेत् ॥ इति ।

---

(१) 'मण्डपे' ख०

पुनराचमनं दद्यात्करोद्वर्त्तनमेव च ।
गाण्डूषिकं जलं दत्त्वा दद्यादाचमनं ततः ॥
विष्वक्सेनोद्धवाक्रूरसनकाद्याः शुकादयः ।
श्रीकृष्णस्य प्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥
बादरायणचण्डीशनन्दिभृङ्गिरिटादयः ।
सदाशिवप्रसादोऽयं सर्वे गृह्णन्तु शाम्भवाः ॥ इति ।
सकर्पूरं च ताम्बूलं दद्यान्नीराजनं तथा ।

चन्द्रिकायां—

लवङ्गजातीकङ्कोलचूर्णं क्रमुकखादिरम् ।
कर्पूरसहितं पत्रं ताम्बूलं च समर्पयेत् ॥

ताम्बूलीपत्राणि च श्वेतानि देयानि,

श्वेतपत्रं च चूर्णं च क्रमुकस्य फलानि च ।
नारिकेलफलोपेतं मातुलिङ्गसमायुतम् ॥
एलाकङ्कोलकर्पूरैर्मुखवासं प्रचक्षते ।

इति वचनात् । अशक्तं प्रति—

महापिप्पलपत्राणि क्रमुकस्य फलानि च ।
शुक्तिक्षारेण संयुक्तं ताम्बूलमिति कीर्त्तितम् ॥

इति वचनात् । संख्यामाह भरद्वाजः—

क्रमुकस्य फलान्यष्टावनुच्छिष्टानि सन्ति च ।
पत्राणि नागवल्ल्याश्च द्विगुणं शुक्तिचूर्णकम् ॥
कर्पूरसहितं यत्तत्ताम्बूलमिति भाषितम् ।

अथवा—

सुपूगं सप्तपत्रं च चूर्णेन च समन्वितम् ।
अदत्त्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद् बुधः ॥
एकपूगं मुखारोगं द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं च अधिकं नैव दुष्यति ॥
अस्यालाभे यथालब्धं पत्रं क्रमुकचूर्णकम् ।
ताम्बूलं भावयेच्छुद्धं यत्तन्नयनवल्लभम् ॥

स्कान्दे—

ताम्बूलं दक्षिणा चैव फलं नीराजनं तथा ।
मन्त्रपुष्पाञ्जलिस्तोत्रच्छत्रचामरवाहनम् ॥
महानीराजनं श्रीमन्मङ्गलेशाय कल्पयेत् ।
कर्पूरेण तु यः कुर्याद्भक्त्या केशवमूर्द्धनि ॥
आरार्तिकं मुनिश्रेष्ठ प्रविशेद्विष्णुमव्ययम् ।
उत्थायोत्थाय कर्त्तव्यं प्रणामं दण्डवद् भुवि ॥
न देवं पृष्ठतः कृत्वा प्रणामं क्वचिदाचरेत् ।
वरमुत्थाय कर्त्तव्यं न वृथा भ्रमणं चरेत् ॥

दक्षिणे भागे नमस्कारः कार्यः,

अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
जपहोमनमस्कारान्न कुर्वीत कदाचन ॥

इति निषेधात् । (१)शिवे तु पुरतोऽपि—

शंभोः पशुपतेरग्रे दण्डवत्पतितो भुवि ।
पतन्ति पातकाः सर्वे नोत्तिष्ठन्ति कदाचन ॥

इति वचनात् । वाराहे—

वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम् ।
सदा स जायते मूर्खः सप्तजन्मनि भामिनि ॥

अन्तरीयान्यद्वस्त्रमिह धर्त्तव्यं योग्यत्वात् ।

नमस्कारेण चैकेन अष्टाङ्गेन हरिं स्मरेत् ।
सूर्याभिवन्दनं कुर्यादुत्थायोत्थाय दण्डवत् ॥
प्रदक्षिणं न कुर्वीत पुरतः पृष्ठदर्शनात् ॥

नमस्कारानन्तरं प्रादक्षिण्यं विनैव नमस्कारान्तरं कार्यमित्यर्थः । "न वृथा भ्रमणं चरेत्" इतिवचनाच्च । अष्टाङ्गो वा कार्यः ।

दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा तथा ।
मनसा वचसा भक्त्या प्रणामोऽष्टाङ्ग ईरितः ॥

---

(१) 'शिवेऽपि' घ० ङ०

ग्रन्थान्तरे—

उरसा शिरसा दृष्ट्या मनसापि धिया तथा ।
पद्भ्यां कराभ्यां वाचा च प्रणामोऽष्टाङ्ग ईरितः ॥
पद्भ्यां कराभ्यां शिरसा पञ्चाङ्गा प्रणतिः स्मृता ।

(१)यद्वा—

शिरो हस्तौ च जानू च चिबुकं बाहुकद्वयम् ।
पञ्चाङ्गस्तु नमस्कारो विद्वद्भिः समुदाहृतः ॥

भविष्ये—

जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवेशे सर्वान्कामानवाप्नुयात् ॥

असम्भवे (२)केवलाभ्यां कराभ्यां कार्यः ।

एकहस्तनमस्कारं एका चैव प्रदक्षिणा ॥
अकालदर्शनं चैव हन्ति पुण्यं पुराकृतम् ॥

इति चन्द्रिकाधृतवचनात् । चन्द्रिकायां—

ततः प्रदक्षिणं कुर्याद्धामं जयजयस्वनैः ।
चक्रवद् भ्रामयेदङ्गं पृष्ठतोऽङ्गं न दर्शयेत् ॥

नारदीये—

पदान्तरे पदं न्यस्यन् हस्तौ चलनवर्जितौ ।
स्तुतिर्वाचि हृदि ध्यानं चतुरङ्गप्रदक्षिणम् ॥

स्कान्दे—

प्रदक्षिणं प्रकुर्वीत शतमष्टोत्तरं सदा ।
तिस्रः सर्वेषु देवेषु सूर्ये सप्त प्रकीर्त्तिताः ॥
विष्णौ चत्वारि वा त्रीणि दुर्गाया एकमेव हि ।
प्रदक्षिणात्रयं कुर्याच्छिवस्यायतने नरः ॥
एकां चण्ड्यां रवौ सप्त तिस्रः कुर्याद्विनायके ।
'एका चैव प्रदक्षिणा' इति अपराधान्तर्गतं तु देवीभिन्नपरम् ।

---

(१) 'यद्वा' नास्ति घ० ङ०
(२) 'असम्भवे मुकुलिताभ्यां कराभ्यां' घ० ङ०

परिशिष्टे तु—

एकां विनायके कुर्याद्वे सूर्ये त्रीणि शंकरे ।
चत्वारि केशवे कुर्यात्सप्ताश्वत्थे प्रदक्षिणाः ॥ इति ।

पौरुषसूक्तं जपस्तोत्रादि चोक्तम् । पारिजाते—

जानुभ्यां धरणीं गत्वा मूर्ध्ना हरिमथो (१)वदेत् ।

तत्र मन्त्रः—

भगवन्देववदेश पुरुषोऽसि सनातन ।
क्षमस्व पुण्डरीकाक्ष भक्तस्य तु विशेषतः ॥
ज्ञानतोऽज्ञानतो वापि कृतं न्यूनाधिकं मया ।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जनार्दन ॥

ततः—

मा(४) मकीनं च सकलं हरये तुभ्यमर्पये ।

इति संकल्पात्मकं स्वात्मार्पणम् ,

(४)मामकीनं च सकलं हरये सम्यगर्पयेत् ॥

इति वचनात् ।

ॐतत्सदिति संप्रोक्तो मन्त्रः स्वात्मसमर्पणे ।

ततः सजलं शंखं नीराजयेत् ,

शङ्खमध्यस्थितं तोयं भ्रामितं केशवोपरि ।
अङ्गलग्नमनुष्याणां ब्रह्महत्याऽयुतं दहेत् ॥

इति लिङ्गात् । एतद्वचनादेव शिरआद्यङ्गप्रोक्षणमपि हस्तेन कार्यम् ।

हस्तेन प्रोक्षणं कृत्वा हत्याकोटिविनाशनम् ।

इति वचनात् ।

भ्रामयित्वा हरेर्मूर्ध्नि मन्दिरं शंखवारिणा ।
प्रोक्षयेद्वैष्णवो यस्तु नाऽशुभं तद्गृहे वसेत् ॥ इति ।

गृहप्रोक्षणमपि हस्तेनैव, दृष्टन्यायात् । नारदीये—

उदकं चन्दनं चक्रं शंखं च तुलसीदलम् ।

---

(१) 'वहेत्' घ० ङ० (४) 'मामदीयं' घ० ङ०

घण्टां पुरुषसूक्तं च ताम्रपात्रम(१)थाष्टमम् ॥
शालग्रामशिला चैव नवभिस्तीर्थमुच्यते ।

अथ तीर्थग्रहणं चन्द्रिकायाम्—

विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम् ।
तदेवाष्टगुणं पापं भूमौ बिन्दुनिपातनात् ॥

तच्च पात्रेणैव कार्यम् ,

यः पादसलिलं विष्णोः करेण पिबते यदि ।
स मूढो नरकं याति यावदिन्द्राश्चतुर्दश ॥

इति भविष्ये करस्य निषेधात् ।

शालग्रामशिलातोयं पिबेद्यः सकरेण तु ।
अज्ञानादैन्दवं प्रोक्तं ज्ञानादब्दं समाचरेत् ॥
श्रीविष्णोः पादसलिलं करे कृत्वा मुखे क्षिपेत् ।
अदत्त्वा पिबते यो वै रौरवे नरके वसेत् ॥

इत्यत्र तु मुखे क्षेपणं न तु पानमिति न तद्विरोधः । एवं—

धारयेन्मूर्ध्नि बालिश्याद्ब्रह्महा स निगद्यते ।

इति वचनं तु चन्द्रिकायां विवृतम्—

शालिग्रामशिलातोयमपीत्वा यस्तु मस्तके ।
प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥ इति ।

तत्र मन्त्रः—

देवदेव जगन्नाथ शङ्खचक्रगदाधर ।
देहि विष्णो ममानुज्ञां तव तीर्थनिषेवणे ॥

तत्र वैदिको मन्त्रः-तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥ अथ पौराणो मन्त्रः—

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥

(१) 'मथाष्टकम्' ख०।

प्राश्नीयात्प्रोक्षयेद्देहं पुत्रमित्रपरिग्रहम् ।
कृत्वा पादोदकं शङ्खे वैष्णवानां महात्मनाम् ॥
तुलसीमिश्रितं दद्यात् पिबेन्मूर्ध्नाऽभिवन्दयेत् ।
आयसे च तथा कांस्ये काष्ठेऽलाबुमये तथा ॥
उद्धृत्य पादसलिलमघतुल्यं विनिर्दिशेत् ।
विष्णोः पादोदकं पीत्वा पश्चादशुचिशङ्कया ॥
आचमेद्यो ह्यपो मोहाद्ब्रह्महा स निगद्यते ।
विष्णुपादोदकात्पूर्वं विप्रपादोदकं पिबेत् ॥
विरुद्धमाचरेन्मोहाद्ब्रह्महा स निगद्यते ।

तत्र मन्त्रः—

पृथिव्यां यानि तीर्थानि तानि तिष्ठन्ति सागरे ।
ससागराणि तीर्थानि पदे विप्रस्य दक्षिणे ॥ इति ।
पादोदकं च निर्माल्यं नैवेद्यं च विशेषतः ।

तत्र मन्त्रः—

नैवेद्यं शिरसा नत्वा श्लोकमेतमुदीरयेत् ।
यस्योच्छिष्टं हि वाञ्छन्ति ब्रह्माद्या ऋषयोऽमलाः ॥
सिद्धाद्याश्च हरेस्तस्य वयमुच्छिष्टभोजिनः ।

चन्द्रिकायाम्—

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥
इमं मन्त्रं समुच्चार्य प्रणमेद्दण्डवद् भुवि ।
अपराधसहस्रं तु क्षमते सर्वगो हरिः ॥

विष्णुधर्मे—

धूपं चारार्त्तिकं पश्येत्कराभ्यां तत्प्रपद्य च ।

एतच्च आत्माग्रं शंखं सपुष्पमभ्यर्च्य घण्टां चाभ्यर्च्य धूपारार्त्तिकार्चनं कार्यम् । वचनान्यन्यत्र बोध्यानि । वाराहे—

धूपार्त्तिं च तथा दीपं कराभ्यां यैर्नमस्कृतम् ।
सप्तजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥

पदार्थादर्शे—

एकाहपूजाविहतौ कुर्याद् द्विगुणमर्चनम् ।
त्रिरात्रे तु महापूजां संप्रोक्षणमतः परम् ॥
संप्रोक्षणं तु देवस्य देवमुद्वास्य पूर्ववत् ।
पञ्च पञ्च क्रमेणैव स्नापयित्वा मृदम्भसा ॥
गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च ।
प्रोक्षयेत्प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम् ॥
ततो मूलेन मूर्धादिपीठान्तं संस्पृशेदपि ।
तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासं च विन्यसेत् ॥
प्राणप्रतिष्ठामन्त्रेण प्रतिष्ठापनमाचरेत् ।
पूजां च महतीं कुर्यात् स्वतन्त्रोक्तां यथाविधि ॥
पूजाहीनादिषु प्रायः सम्प्रेक्षणविधिः स्मृतः ॥

शालग्रामादौ न प्राणप्रतिष्ठा किन्तु महापूजैवेति स्मर्त्तव्यम् ।

विष्णुरहस्ये—

इति विष्ण्वर्चनं ये तु प्रकुर्वन्ति नरा भुवि ।
ते यान्ति शाश्वतं विष्णोरनन्तं परमं पदम् ॥

विष्णुः—

देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् ।
स वै देवलको नाम हव्यकव्ये विगर्हितः ॥

अथ द्वात्रिंशत्पूजापराधा वाराहे—

भुक्त्वा तु परकीयान्नं तत्परस्तन्निवर्त्तकः ।
प्रथमश्चापराधोऽयं सर्वविघ्नाय वै भवेत् ॥
अभुक्ता दन्तकाष्ठं तु यस्तु मामुपसर्पति ।
अपराधो द्वितीयोऽयं धर्मविघ्नाय कल्प्यते ॥
कृत्वा मैथुनसंयोगं यस्तु मां स्पृशते नरः ।
तृतीयमपराधं तं कल्पयामि वसुन्धरे ॥
स्पृष्ट्वा रजस्वलां नारीमस्माकं यः प्रपद्यते ।
तुर्यमपराधं तं कल्पयामि वसुन्धरे ॥

स्पृष्ट्वा तु मृतकं चैव असत्कारकृतं तु वै ।
पञ्चमं चापराधं तु न क्षमामि वसुन्धरे ॥
स्पृष्ट्वा तु [illegible] वस्तु वाचम्य स्पृशते हि माम् ।
षष्ठं तमपराधं वै न क्षमामि वसुंधरे ॥
ममार्चनस्य काले तु युवतिं यस्य गच्छति ।
सप्तमं चापराधं हि न क्षमामि वसुंधरे ॥
ममैवार्चनकालेतु यस्त्वसत्यं प्रभाषते ।
नवमं चापराधं तं न क्षमामि वसुन्धरे ॥
अविधानेन मां स्पृश्य मामेव प्रतिषेवते ।
दशमश्चापराधोऽयं मम चाप्रियकारकः ॥
सक्रोधो यः स्पृशेद्गात्रं चित्तं कृत्वा निलाचलम् ।
एकादशं चापराधं न क्षमामि वसुन्धरे ॥
अकर्मण्यानि पुण्यानि यस्तु मामुपकल्पयेत् ।
द्वादशं चापराधं तं न क्षमामि वसुन्धरे ॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति ।
त्रयोदशं चापराधं न क्षमामि वसुन्धरे ॥
अन्धकारे च मां देवि यः स्पृशेत्तु कदाचन ।
चतुर्दशं चापराधं न क्षमामि वसुन्धरे ॥
यस्तु कृष्णेन वस्त्रेण मम कर्माणि कारयेत् ।
पञ्चदशं चापराधं न क्षमामि वसुंधरे ॥
अधौतेन च वस्त्रेण यस्तु मामुपसर्पति ।
षोडशं चापराधं तं न क्षमामि वसुंधरे ॥
स्वयमन्नं च यो दद्यादज्ञाताय च माधवम् ।
सप्तदशापराधं तं न क्षमामि वसुन्धरे ॥
यस्तु मात्स्यानि मांसानि भक्षयित्वोपसर्पति ।
अष्टादशापराधं तं न क्षमामि वसुन्धरे ॥
जालपादं भक्षयित्वा यस्तु मां प्रतिषेवते ।
एकोनविंशापराधं न क्षमामि वसुन्धरे ॥

[illegible] दीपं स्पृष्ट्वा तु यो देवि ग्रामकर्माणि [illegible]
विंशतिं चापराधं तं न क्षमामि वसुन्धरे ॥
श्मशानं यस्तु वै गत्वा मामेव प्रतिपद्यते ।
एकविंशमपराधं तं न क्षमामि वसुंधरे ॥
पिण्याकं भक्षयित्वा तु यो मामेवाभिगच्छति ।
द्वाविंशं चापराधं तं न क्षमामि वसुन्धरे ॥
यस्तु वराहमांसानि भक्षयित्वोपसर्पति ।
अपराधं त्रयोविंशं न क्षमामि वसुन्धरे ॥
सुरां पीत्वा च यो मर्त्यः कदाचिदुपसर्पति ।
अपराधं चतुर्विंशं न क्षमामि वसुंधरे ॥
कुसुम्भशाकं भक्षयित्वा यस्तु मामुपसर्पति ।
अपराधं पञ्चविंशं न क्षमामि वसुन्धरे ॥
परप्रावरणेनैव यस्तु मामुपसर्पति ।
षड्विंशापराधं तं न क्षमामि वसुन्धरे ॥
अजीर्णेन समाविष्टो यस्तु मामुपसर्पति ।
त्रिंशकं चापराधं तं न क्षमामि वसुन्धरे ॥
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति ।
एकत्रिंशं चापराधं न क्षमामि वसुंधरे ॥
विना तूर्यादिघोषेण द्वारस्योद्घाटनं मम ।
महापराधं जानीयाद् द्वात्रिंशं तं मम प्रिये ॥

एषु प्रत्येकं प्रायश्चित्तं तत्रैव ।
संवत्सरस्य मध्ये च तीर्थे सूकरके मम ॥
कृतोपवासस्तु नरो मद्भावं शुद्धिमाप्नुयात् ।
मथुरायां तथा चैव सापराधः शुचिर्भवेत् ॥

स्कान्दे—
जागरेद् द्वादशीरात्रौ पठेद्यस्तुलसीस्तवम् ।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः ॥

पुराणोक्तस्तुलसीस्तवो व्रतरत्नादौ बोध्यः । प्रकारान्तरेण कृष्णभट्टीये—

तिर्यक्पुण्ड्रधरो भूत्वा यः कुर्यादेवतार्चनम् ।
याचितैः पत्रपुष्पाद्यैर्यः करोति ममार्चनम् ॥
अप्रक्षालितपादो यः प्रविशेन्मम मन्दिरम् ।
मम दृष्टेरभिमुखं ताम्बूलं चर्वयेच्च यः ॥
कौसुम्भशाकं मर्त्यो वा भक्षयेन्मम सेवकः ।
उरुवूकपलाशस्थैः पुष्पैः कुर्यान्ममार्चनम् ॥
ममार्चामासुरे काले यः करोति विमूढधीः ।
अवैष्णवस्य पक्वान्नं यो मर्त्यो विनिवेदयेत् ॥
अवैष्णवेषु पश्यत्सु मत्पूजां विदधाति यः ।
दिनान्तरितपक्वान्नं यो मह्यं विनिवेदयेत् ॥
नीलीरञ्जितवस्त्रं च यो मह्यं विनिवेदयेत् ।
नवप्रक्षालितं वस्त्रं जीर्णं वा विनिवेदयेत् ॥
अमौनी घर्मलिप्ताङ्गो मत्पूजां विदधाति यः ।
वातमूत्रनिरोधेन मत्पूजां विदधाति यः ॥
नखोदकेन स्नपनं कुरुते यश्च मानवः ।
कृत्वा वातमनाचम्य तथा प्रावृत्य कम्बलम् ॥
पीठासनोपविष्टो वा पूजयेद्वा निरासनः ।
मृन्मयं धूपदहनं दीपं यः कुरुतेऽर्चने ॥
मत्पूजको(१)न कुरुते तन्तुपूजां च दामिनीम् ।
मत्पूजकः शिवद्वेषी शिवभक्तश्च मां द्विषेत् ॥
भूताष्टम्योर्न कुरुते नक्तं न हरिवासरम् ।
परस्य परिधानं च परिधायार्चयीत च ॥
अपूजयित्वा विघ्नेशमसम्भाष्य कपालिकम् ।
कुद्धो यत्कर्म कुरुते त्रिकालार्चनविघ्नकृत् ॥
अन्धकारे स्पृशेन्मां यः सम्भाष्य च रजस्वलाम् ।

(१) 'कोतत्कुरुते' ख०

वामहस्ते च मां कृत्वा स्नापयेद्यदि मूढधीः ॥
महापराधाज्ञानीहि द्वात्रिंशन्न क्षमामि तान् ।

अन्ये चागस्तिनोक्ताः—

यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे ।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥
उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम् ।
एकहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणम् ॥
पादप्रसारणं चाग्रे तथा पर्यङ्कबन्धनम् ।
शमवातक्षणं(?) चैव मिथ्याभाषणमेव च ॥
उच्चैर्भाषितजल्पौ वा रोदनादिग्रहः ग्रहः ।
अग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणम् ॥
कम्बलावरणं चैव परानिन्दा परस्तुतिः ।
अश्लीलभाषणं चैव अधोवायुविमोक्षणम् ॥
शक्तौ गौणोपचारस्तु अनिवेदितभक्षणम् ।
तत्तत्कालोद्भवानां च फलादीनामनर्पणम् ॥
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिकम् ।
पृष्ठीकृत्यासनं चैव परेषामभिवादनम् ॥
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ।
अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्त्तिताः ॥

अथापराधशतं गारुडे—

नारद उवाच—

कस्य कस्यापराधस्य किं फलं का गतिश्च भो ।
प्रत्येकमपराधस्य प्रायश्चित्तिश्च का भवेत् ॥
अशक्तश्च जडो वापि कथं शुद्धो वदस्व मे ।

ब्रह्मोवाच—

स्नानहीनस्तु यो मर्त्यः कृत्वा वै देवतार्चनम् ।
रौरवं नरकं याति यावदाभूतसंप्लवम् ॥

तस्यापंचितिमन्विच्छन् जपेदष्टाक्षरं मनुम् ।
अयुतं सर्वपापघ्नं ततः शुद्धो भवेन्नरः ॥
निःशङ्कं देवतागारं प्रवेशं च करोति यः ।
असिपत्रवने घोरे पतत्यब्रह्मणो दिनम् ॥
पञ्चरात्रोपवासेन पञ्चगव्येन शुद्धयति ।
अप्रक्षालितपादश्च प्रविशेदेवतालयम् ॥
विष्ठाकृमिर्भवेत्पापी सप्त(१)जन्मसु मानवः ।
देवस्यानम्रशिरसा गच्छेदभिमुखं नरः ॥
कुम्भीपाके महाघोरे पतत्याचन्द्रतारकम् ।
गोमयालिप्तदेशे तु हरेः पूजां करोति यः ॥
सुतप्तवालुके घोरे नरके पतति ध्रुवम् ।
त्रिरावृत्य स पापात्मा गीतां शुद्धयति निश्चयः ॥
धूपहीनां च यः कुर्यात्पूजां विष्णोर्महात्मनः ।
तुषाग्नौ नाम नरके यावदिन्द्राश्चतुर्दश ॥
दशाङ्गं गुग्गुलं दत्त्वा स पापी शुद्ध्यति ध्रुवम् ।
घण्टानादविहीनां च देवतार्चां करोति यः ॥
कोलाहले महाघोरे नरके पतति ध्रुवम् ।
वेदपारायणं कृत्वा स पुमान् शुद्धिमाप्नुयात् ॥
मुखफूत्कृत्य वह्नौ तु धूपधूमं करोति यः ।
महातमसि नरके पतत्यालोक(२)संक्षयम् ॥
दीपमालां हरेः कृत्वा स च शुद्धिमवाप्नुयात् ।
स्तोत्रपाठं विना तूष्णीं यो निर्माल्यं विसर्जयेत् ॥
निरुच्छ्वासे च नरके यावदिन्द्रपदं पतेत् ।
सहस्रनामपठनाच्छुद्धिं याति यतव्रतः ॥
अग्रोदकं त्रिवारं न वरुणेन शोधयेद्यदि ।
कालभक्षे महाघोरे पतत्येव नराधमः ॥

(१) 'शतजन्मस्तु' ख०
(२) 'संक्षये' ख०

ग्रीष्मे पानीयदानेन स पूतो जायते नरः ।
स्वच्छायाग्रोदकार्थस्तु कुर्यादेवाभिषेचनम् ॥
तप्तपङ्कहृदं नाम नरकं याति मानवः ।
स सुवर्णाभिषेकेण हरेः शुद्धिमवाप्नुयात् ॥
अनाच्छाद्योदकुम्भस्य मुखे अग्रोदकाहृतम् ।
करोति मौढ्यात्पच्येत कालसूत्रादिषु द्विजः ॥
पवमानाभिषेकेण पवित्रो जायते नरः ।
अभक्ष्यभक्षणं यस्तु कुर्याद्वेदविगर्हितम् ॥
भयानके महाघोरे वासमाप्नोति मानवः ।
एकादश्युपवासे च तुलसीभक्षणाच्छुचिः ॥
अभक्ष्याणि च शाकानि तथैवान्नानि नारद ।
यो यो निवेदयेद्विष्णौ महारौरवमेति सः ॥
पराकं च व्रतं कृत्वा शुद्धिं प्राप्नोति मानवः ।
कक्षश्मश्रुनखस्पृष्टहस्ताद्देवाङ्गस्पर्शने ॥
अष्टभौमे महाघोरे वसत्याधुवमण्डलम् ।
अस्यवामस्य सूक्तस्य जपाच्छुद्धिमवाप्नुयात् ॥
अन्यावशिष्टवस्त्रस्य देवतायाः समर्पणात् ।
सुघोरं नाम नरकं प्रयात्यामनुकल्पकम् ॥
हीनवस्त्रार्चनां यस्तु करोति परमात्मनः ।
अतिघोरं च नरकं प्रयात्याभूतसंप्लवम् ॥
शीतार्ते वस्त्रदानेन पूतो भवति मानवः ।
योऽर्चां तु कुरुते विष्णोर्नीलवस्त्रेण मानवः ॥
कालरात्रिं महाघोरं नरकं याति दारुणम् ।
रात्रिसूक्ताच्चरुं हुत्वा शुद्धो भवति मानवः ॥
अधौतवस्त्रं यो विष्णोः समर्पयति मानवः ।
शूकरं नाम नरकं प्रयात्यालस्यदूषितः ॥
अतोदेवाश्चरुं हुत्वा पायसं शुद्धिमाप्नुयात् ।
निषिद्धान्नेन नैवेद्यं यः करोति नराधमः ॥

मलभोजं महाघोरं नरकं याति दारुणम् ।
नखश्मश्रुविना यस्तु दरिद्रो भुवि जायते ॥
द्वादश्यां भोजयित्वा तु ब्राह्मणान् शुद्धिमाप्नुयात् ।
अष्टाक्षरोपदेशस्तु यस्य कस्य गुरोर्न हि ॥
तादृशः पूजयित्वा तु विष्णुं वेदैकनायकम् ।
करालं नरकं याति यत्र दुःखानि भूरिशः ॥
सच्छास्त्रश्रवणादेव शुद्धिमाप्नोति निश्चितम् ।
शूद्राहृतैश्च कुसुमैर्विष्णोः पूजां करोति यः ॥
कीटदं नाम नरकं नानादुःखालयं व्रजेत् ।
पवित्रं तेत्यृचा हुत्वा स्नात्वा नद्यां शुचिर्भवेत् ॥
शूद्राहृतं न दुष्टं स्यात्सिद्धस्थाने महोत्सवे ।
शूद्राहृतं न दुष्टं तु शूद्रस्य हरिपूजने ॥
धौतपुष्पैः सपर्यां तु यः कुर्याच्छार्ङ्गधन्वनः ।
स चण्डनरकं याति पश्चाद्वैश्यो भवेन्नरः ॥
दधिक्राव्णऋचा विष्णुं दध्ना कृत्वा शुचिर्भवेत् ।
अन्यावशिष्टपर्युष्टम्लानपुष्पैर्हरिं यजेत् ॥
पद्मापद्मावतीभीमनरकान् याति दारुणान् ।
अतोदेवा-इदंविष्णुः-पौरुषं क्रमशो हुनेत् ॥
आज्यं पयः पायसं च क्रमाच्छुद्धो भवेन्नरः ।
छिन्नभिन्नातिरिक्तानां पुष्पाणां तु समर्पणात् ॥
बहुसूचीमहासूचीसंज्ञान् याति च मानवः ।
पञ्चामृताभिषेकेण महानदजलाप्लुतः ॥
पयसा स्नापनाद्विष्णोः पश्चाच्छुद्धो भवेन्नरः ।
स्वाङ्गभृगलितानां च निष्टप्तानां समर्पणात् ॥
अतिवातं महावातं चक्रवातं प्रयाति सः ।
अन्नधेनोः स्वर्णधेनोर्मधुधेनोश्च दानतः ॥
शुद्धं सुखमवाप्नोति परत्र च परां गतिम् ।
वस्त्रपूतार्कपूतादेरण्डादिपुटात्तथा ॥

आहृतैः पुष्पपत्राद्यैः पूजां विष्णोः करोति यः ।
अतितापं महाताप्रमतिशीतं प्रयाति सः ॥
निर्गन्धपुष्पैः पूजां [तु] मुकुन्दस्य करोति यः ।
तथा पूयवहं नाम नरकं व्रजति ध्रुवम् ॥
वासहीनो भवेद् भूमौ पद्मपुष्पार्पणाच्छुचिः ।
तुलसीरहितैः पुष्पैर्योऽर्चयेदच्युतं हरिम् ॥
तामसं नरकं याति पुनरुत्थानवर्जितम् ।
कार्त्तिक्यां तुलसीपत्रैः संपूज्य च शुचिर्भवेत् ॥
लोकवार्त्तां वदन्विष्णोर्निर्माल्यं यस्तु लङ्घयेत् ।
चण्डकोलाहलं नाम नरकं याति दारुणम् ॥
पारायणात् पावमान्याः शुद्धतामेति मानवः ।
अप्रक्षाल्य च पुष्पाणि विष्णोः पूजां करोति यः ॥
कृमिभक्षमहाघोरं नरकं चाधिगच्छति ।
मन्दधीर्जायते भूमौ गोग्रासाच्छुध्यते नरः ॥
प्रक्षाल्य तुलसीं विष्णोः स्नपयेत् च करोति यः ।
सर्वसौख्यहरं नाम नरकं प्राप्य दुःखितः ॥
आवाहनादिषण्मुद्रां विना चर्चां करोति यः ।
देहयोगवियोगाख्ये नरके वासमाप्नुयात् ॥
पुष्पाञ्जलिं मन्त्ररूपं दत्त्वा शुद्धिमवाप्नुयात् ।
अग्निज्वालं प्रयात्याशु तथैवैरण्डदीपतः ॥
पिष्टामलकदीपस्य प्रदानाच्छुद्धिमाप्नुयात् ।
पञ्चसंस्कारहीनस्तु नरकं याति दारुणम् ॥
गङ्गावगाहनाद्वापि भारतस्य च कीर्त्तनात् ।
स नरः शुद्धिमाप्नोति नान्यथा शुद्धितामियात् ॥
शून्यदीपे विलुप्ते तु पूजां कर्त्तुं यदीच्छति ।
तैलयन्त्रं महाघोरं गत्वा तत्र निपीड्यते ॥
शङ्कराद्यैः समत्वेन विष्णोरर्चां करोति यः ।
स चान्धतमसो नाम्नो नरकानधिगच्छति ॥

सेनान्यैः पितृभिश्चैव संध्याकालं हरिं व्रजेत् ।
दुःखोत्कटं नाम नरकं याति ब्रह्मार्पणं नरः ॥
श्रुत्वा भागवतं शास्त्रं शुद्धिमान् जायते नरः ।
पद्माक्षतुलसीमालाहीनकण्ठो वसेन्नरः ॥
शालग्रामैर्नरकं याति वल्मिबद्धो भवेन्नरः ।
कार्त्तिकमां पद्ममालाभिः सुसंपूज्य शुचिर्भवेत् ॥
उत्तरीयपरित्यागाच्छायाही(१)ने फलत्यसौ ।
शिरःशून्ये भवेद् भूमौ दीर्घश्मश्रुर्दरिद्रता शुचिर्भवेत् ॥
अपवित्रकरो यस्तु विष्णोरर्चां करोति यः ।
नरके पूयशोणाख्ये भुक्त्वा दुःखान्यनेकशः ॥
व्याधो भूत्वा सुपापीयान्नरकाने(२)कविंशतिः ।
अकच्छः पृष्ठकच्छो वा देवतार्चां करोति यः ॥
रेतसो भाजनं याति उपजग्धी भवेन्नरः ।
अश्वत्थसेवनाच्छुद्धस्तुलसीचन्दनादपि ॥
पाषण्डिनां च संसर्गं यः करोति दुराग्रहात् ।
सप्तशीलालयं नाम नरकं याति दारुणम् ॥
बहुभुग्नो भवेद् भूमौ सत्संगात्सः विशुद्धयति ।
अनभ्यस्य च सच्छास्त्रं यो दुःशास्त्रं समभ्यसेत् ॥
अङ्गाररााशिभवनं नरकं याति दारुणम् ।
स भूप्रदक्षिणां कृत्वा शुद्धिमाप्नोति निश्चितम् ॥
नरस्तुतीनां श्रवणं यः करोति नराधमः ।
नदीं वैतरणीं याति पूज्यस्तुत्या विशुद्धयति ॥
यः करोति विमूढात्मा नरस्तुत्या तु जीवनम् ।
मुसलोलूखलं नाम नरकं चाधिगच्छति ॥
नित्यं स पश्चिमे यामे विष्णुस्तुत्या विशुद्धयति ।
पूज्यस्तुतिपरित्यागं यः कुर्यान्मनुजाधमः ॥

(१) 'हीनेष्वतत्पयम्' ख०
(२) 'नेव विन्दति' ख०

पूतिमांसादनं नाम नरकं सोऽधिगच्छति ।
मुखरोगी च भवति श्रवणाच्छुचिः ॥
विष्णोर्निन्दां गुरोर्निन्दां श्रुत्वैव मनुजाधमः ।
नरकं चान्ध(१)तामिस्रं भुक्त्वा युगशतत्रयम् ॥
कपिलागोसहस्रं च दत्त्वा शुद्धिमवाप्नुयात् ।
अथवा विष्णुमाहात्म्यं श्रुत्वा शुद्धिमवाप्नुयात् ॥
सत्पुंसनिन्दाश्रवणं सच्छास्त्रस्यापि नारद ।
यः करोति विमूढात्मा महारौरवमेति सः ॥
स च्छिन्नोष्ठो भवेद् मूमौ भूमिदानेन शुध्यति ।
देवार्चासमये बालान् लालयन्मनुजाधमः ॥
इक्षुयन्त्रे महाघोरे पीड्यते यमकिङ्करैः ।
श्रुत्वा च शास्त्रसंदर्भं बालिशो नाभिपूज्यते ॥
देवालये पताकानां दानाच्छुद्ध्यति मानवः ।
व्यासङ्गादेवतार्चायां कृतायां मनुजेन वै ॥
आस्फालयन्ति तं याम्या क्षुरपाय शिलातले ।
पुस्तकस्य प्रदानेन तस्मात्पापात्प्रमुच्यते ॥
नखादिमलिनानां च देवागारे विसर्जने ।
विष्ठाकूपे पतत्याशु तत्रैव मलभोजनः ॥
चक्रकारो भवेद् भूमौ गन्धदानेन शुद्ध्यति ।
आज्याभिधारहीनस्य नैवेद्यस्य समर्पणे ॥
स तु हालाहलं नाम नरकं याति दारुणम् ।
स चापि शुद्धिमाप्नोति शतब्राह्मणभोजनात् ॥
आलस्यादेवपूजायां तूष्णीं क्रीडति वा विभो ।
यः करोति विमूढात्मा चक्रे भेदान्निपीड्यते ॥
मलं बध्वा देवपूजां यश्चाचरति मूढधीः ।
तैलकूपं पातयन्ति तं पापं यमकिङ्कराः ॥

(१) 'तामिस्रं पतेद् युग' स्व०

अजीर्णान्नो जले यस्तु देहमूत्रं समाचरेत् ।
स पापेऽत्वा ध्रुवं याति नरकं तोयमानुषम् ॥
देवस्य पूजासमये विद्वित्वा पेषणं सताम् ।
प्रत्युत्थानं न कुर्याद्यः स याति नरकं ध्रुवम् ॥
महतां लेखनादेव हृतो शुद्धिर्न विद्यते ।
नित्यकर्मपरिभ्रंशी सर्वलेखान् वजत्यधः ॥
[illegible] स शुद्धिं याति वै मानवः ।
श्वपाको मनुजो कापि यः शृणोति हरेः कथाम् ॥
नानादुःखग्रहं नाम नरकं याति दारुणम् ।
पश्चाद्म्लेच्छो भवेद् भूमौ गृहदानाद्विशुद्धयति ॥
शृण्वन् पौराणिकीं गाथां कृत्वा ताम्बूलचर्वणम् ।
स याति नरकं घोरं वह्निभोजनसंज्ञकम् ॥
गुरोः समानरूढः सन् पुराणं यः शृणोति च ।
तप्तशूलासनं नाम नरकं याति दारुणम् ॥
गुरोः पर्यङ्कदानेन शुद्धिमाप्नोत्यसंशयम् ।
अश्रद्धया नरः श्रुत्वा पुराणं पापनाशनम् ॥
संमोहनं महाघोरं नरकं याति दुःखदम् ।
गत्वाऽपस्माररोगाढ्यः पुनरेवाभिजायते ॥
दिनापहसनं लोकवार्त्तया गृहचिन्तया ।
कुर्वन्निरयमाप्नोति तमशोणहदं नरः ॥
नमस्कारान्परं विष्णोः कृत्वा धूलिविधूननम् ।
तप्तधूलिनदं नाम नरकं चाधिगच्छति ॥
आरूढवृषभाशुद्धो युगबद्धवृषद्वयः ।
ताभ्यां वृषाभ्यां नियमात्किंचिद् दूरं व्रजेद् ध्रुवम् ॥
तेन शुद्धिमवाप्नोति नरकाद्वा कथञ्चन ।
आर्द्रवस्त्रधरो यस्तु कुर्वन्वै देवतार्चनम् ॥
अङ्गारवृष्टिपतनं नरकं प्रतिपद्यते ।
यतीनां वस्त्रदानेन मृदा स्नानेन शुद्धयति ॥

एकादशीदिने मासे यो भुङ्क्ते हरिवासरे ।
कृमिराशिः वसत्याशु यावदाभूतसंप्लवम् ॥
शुद्धिमाप्नोत्ययं स्नानात् केशवत्यां कृष्णसंनिधौ ।
दीक्षितो देवपूजायां पूर्वं मैथुनमाचरेत् ॥
आयसाः कण्टकास्तीक्ष्णा नरके कूटशाल्मलौ ।
पुंसूक्तमपठित्वा तु देवपूजां करोति यः ॥
वदनान्तरविन्यस्तसुप्ततप्तायोगडी ।
आदावन्ते च साहस्रनामपाठविवर्जनात् ॥
तैलपूर्णकटाहेषु सन्तप्तेषु तु मानवः ।
निक्षिप्तोऽप्यात्मनो जिह्वां यमाज्ञाकारिभिर्भटैः ॥
अहुत्वा वाप्यदत्त्वा वा भोजनं कुरुते नरः ।
महोक्षमूत्रपूर्णायां वाप्यां वै क्षिप्यते नरः ॥
बृहदारण्यकं जप्त्वा चतुर्भिर्मुच्यते नरः ।
पुण्यकालोक्तातिशयसपर्यां यस्तु मुञ्चति ॥
क्षारोदं नाम नरकं नरो याति सुदारुणम् ।
तत्र शस्त्रैर्विशीर्णाङ्गो नमस्कारैर्विशुद्ध्यति ॥
अनिवेदितमन्नं यैः शङ्खचक्रगदाभृतः ।
(भुनक्तीति शेषः ।)
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥
चान्द्रायणत्रयं कृत्वा शुद्धिमाप्नोति मानवः ।
अन्यदेवार्पितं चान्नं यो भुङ्क्ते ज्ञानदुर्बलः ॥
(धू(१)म्रपाने महाघोरे आकल्पान्तमधो(२)मुखम् ।
विष्णुस्थानविहीने तु ग्रामेवासी नराधमः ॥)
जन्तुपङ्के महाघोरे क्षिप्तः क्रन्दति विस्तरम् ।
स पङ्गुर्जायते भूमौ गङ्गासागरसंगमे ॥

---

(१) धनुश्चिन्हान्तर्गतं नास्ति घ० ङ० ।
(२) इतोऽग्रे 'चान्द्रायणत्रयं' पाठोऽधिकः ख०

स्नातः शुद्धिमवाप्नोति कथायाः श्रवणेन च ।
सत्संगमविहीने च ग्रामेवासी नराधमः ॥
शस्त्रावर्षे पतेद्धोरे शुद्धः स्यात्तीर्थसेवया ।
श्रुतेषु नामधेयानि विष्णोरन्यस्य नामतः ॥
आह्वानं कुरुते यस्तु तैलकुम्भे पतेद् ध्रुवम् ।
सकामः पूजितो येन देवदेवो जनार्दनः ॥
निवृत्तिमार्गे सरतः शुद्धिमेति न चान्यथा ।
देवोपकरणैर्यस्तु गृहयात्रां निवर्त्तयेत् ॥
महापेषे महाघोरे मुसलैः पीड्यते भृशम् ।
पक्षियोनिमवाप्नोति देवालंकरणाच्छुचिः ॥
शयानो मिथुनीभोगादेवागारे नराधमः ।
शरत्पेषे महाघोरे प्राजापत्येन शुध्यति ॥
विना शङ्खं महाविष्णोरभिषेकं करोति यः ।
निरन्नं नरकं गत्वा स्वमांसं खादते नरः ॥
शङ्खेन पयसा देवं स्नाप्य शुद्धिमवाप्नुयात् ।
विष्णोरभिमुखं पादप्रसारं कुरुते नरः ॥
तं पापं पार्ष्णिदेशे तु छिद्रं कुर्वन्ति सत्वरम् ।
सेतुं गत्वा समुद्रस्य गङ्गासागरसंगमे ॥
स्नात्वा शुद्धिमवाप्नोति नान्यथा तु कथञ्चन ।
अवृन्दावनगेहे च निवसन्मानुषाधमः ॥
सर्वानेतान्महाक्रूरान्नरकान्(१)कविंशतिः ।
व्रतभ्रष्टो महापापं महारौरवमेति सः ॥
व्याघ्रयोनिमवाप्नोति बन्दिमोक्षाच्च शुध्यति ।
तुलामकरमेषे तु प्रातःस्नानविवर्जनात् ॥
पैशाचीं योनिमाप्नोति यावदाभूतसंप्लवम् ।
श्रुत्वा सच्छास्त्रमाहात्म्यं शुद्धिमाप्नोति मानवः ॥

(१) 'नेव विन्दति' ख०।

अविभक्तानां पृथग्देवपूजामाह प्रयोगपारिजाते शाङ्खलायनः—

पृथगप्येकपाकानां ब्रह्मयज्ञो द्विजातिनाम्।
अग्निहोत्रं सुरार्चा च संध्या नित्यं भवेत्पृथक्॥

तत्रैव विष्णुधर्मे—

*शालग्रामशिलां वापि चक्राङ्कितशिलां तथा।
ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत्॥

इदं स्पर्शसहितपूजाविषयम्।

शूद्रो वाऽनुपनीतो वा स्त्रियो वा पतितोऽपि वा।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते॥
ब्राह्मण्यपि हरं विष्णुं न स्पृशेच्छ्रेय इच्छती।
सनाथा मृतनाथा वा तस्या नास्तीह निष्कृतिः॥
स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर।
स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य च॥

इति स्कान्दात्। स्पर्शरहिता तु तयोर्भवत्येव,

शालग्रामं न स्पृशेत्तु हीनवर्णो वसुंधरे।

पूजान्ते देवदेवस्य मुखवस्त्रार्पणं न हि।
डाकिनीं योनिमासाद्य तिष्ठत्याभूतसंप्लवम्॥
देवस्य दर्पणं दत्त्वा सद्यः पूतो भवेन्नरः।
ब्रह्मपारंपरं स्तोत्रं पूजान्ते न पठेद्यदि॥
न गृह्णाति स्वयं तस्य पूजां चैव तु वार्षिकीम्।
इत्येतत्कथितं सर्वमपराधफलं मुने॥
प्रायश्चित्तं मया तेषां विस्तरेण च वर्णितम्॥ इति।

*शालग्राममिति। शालग्रामो न विक्रेतव्यः। तथाच स्कान्दे—

शालग्रामशिलायास्तु मूल्यं यः कुरुते नरः।
विक्रेता चानुमन्ता च यः परीक्षानुमोदकः॥

स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः ॥
मोहाद्यः संस्पृशेच्छूद्रो योषिद्वापि कदाचन ।
स्वपते नरके घोरे यावदाभूतसंप्लवम् ॥
यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुंधरे ।
दूरादेवास्पृशन्पूजां कारयेत्सुसमाहितः ॥

इति वाराहोक्तेः । (१)शालग्रामशिलामात्रे निर्बन्धो न प्रतिमादौ,

सर्ववर्णैस्तु संपूज्याः प्रतिमाः सर्वदेवताः ।
लिङ्गान्यपि तु पूज्यानि मणिभिः(२)कल्पितानि च ॥

इति तत्रैवोक्तेः ।

चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः ।
वैश्यैर्द्वावेव संपूज्यौ तथैकः शूद्रजातिभिः ॥

इति स्कान्दात् । अन्ये तु दीक्षितविषयत्वेन व्यवस्थामाहुः । विष्णुधर्मे—

तयोरसंभवेऽर्चा वै सा चेह नवधा स्मृता ।
रत्नजा हेमजा चैव राजती ताम्रजा तथा ॥

सर्वे ते नरकं यान्ति यावदाभूतसंप्लवम् ॥ इति ।
स्त्रीशूद्रयोः स्पर्शपूजावत् साक्षात्शालग्रामपूजा निषिद्धा ।

ब्राह्मणक्षत्रवैश्याश्च त्रयाणां मुनिसत्तम ।
अधिकारः स्मृतः सद्भिः शालग्रामशिलार्चने ॥
दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः ।
कर्त्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनम् ॥

इति पद्मात् । पाद्मे—

द्वारकाशैलसंभूतं यस्तोयं पिबते कलौ ।
पापानि तस्य नश्यन्ति शतजन्मार्जितान्यपि ॥

---

(१) 'शालग्राममात्रनिषेधो न' क०
(२) 'कल्पितास्तथा' क०

रैतिक्यचा तथा लौही शैलजा द्रुमजा तथा ।
अधमाधमा च विज्ञेया मृन्मयी प्रतिमा च या ॥
एषां फलानि तत्रैव ज्ञेयानि ।
(ना(१)र्च्या गृहेऽङ्गुष्ठजा मूर्तिश्चतुरङ्गुलतोऽधिका ।
न वितस्त्यधिका धातुसंभवा श्रेय इच्छता ॥
एवंलक्षणसंपन्ना पारंपर्यक्रमागता ।
उत्तमा सा तु विज्ञेया गुरुदत्तापि तत्समा ॥)
तत्रैव पाद्मे शालग्रामं प्रक्रम्य—
तत्राप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत् ।
यथा यथा शिला सूक्ष्मा तथा स्यात्तु महत्फलम् ॥
तथा—
यवमात्रं तु गर्तः स्याद्यवार्धं लिङ्गमुच्यते ।
शिवनाभिरिति ख्यातस्त्रिषु लोकेषु दुर्लभः ॥

धृते शिरसि पीते च सर्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तं हि पापानां क(१)लौ पादोदकं हरेः ॥ इति ।
शिलैव शैलं, स्वार्थेऽण् । द्वारकाशिलापूजायाः पृथक्करणस्थले एतत्, शालग्रामसहपूजने तस्यार्थतः सिद्धत्वात् । कौर्मे—
यो मोहादथ बालिश्यादकृत्वा देवतार्चनम् ।
भुङ्क्ते स याति नरकान् सूकरेष्वेव जायते ॥
यत्तु—
दानाध्ययनदेवार्चाजपहोमव्रतादिकम् ।
न कुर्याच्छ्राद्धदिवसे प्राग्विप्राणां विसर्जनात् ॥ इति ।
तन्निषेधजं,
श्राद्धाह्नि तु समभ्यर्च्य नृवराहं जनार्दनम् ।
इति विष्णुधर्मात् ।
पूजयित्वा शिवं भक्त्या पितृश्राद्धं प्रकल्पयेत् ।

---

(१) 'कंसान्तर्गतं नास्ति' क० (२) 'कुलपादोदकं' घ० ङ०

तत्रैव—

शालग्राममयी मुद्रा संस्थिता यत्र कुत्रचित् ।
वाराणस्या यवाधिक्यं समन्ताद्योजनत्रयम् ॥
यो मृतस्तत्समीपे तु मृतो वा नीयतेऽन्तिकम् ।
स वै मोक्षमवाप्नोति सत्यं सत्यं न चान्यथा ॥

तत्रैव—

चक्राङ्कमिथुनं पूज्यं नैकं चक्राङ्कमर्चयेत् ।
चक्राङ्कमिथुनात्सार्धं शालग्रामं प्रपूजयेत् ॥

तत्रैव वाराहे—

म्लेच्छदेशे शुचौ वापि चक्राङ्को यत्र तिष्ठति ।
यो(१)जनानां तथा त्रीणि मम क्षेत्रं वसुंधरे ॥

तत्रैव शालग्रामं प्रक्रम्य—

क्रयक्रीता परिज्ञेया मध्यमा याचिताऽधमा ॥

प्रयोगपारिजाते वाराहे—

एवंलक्षणसंपन्ना पारंपर्यक्रमागता ।
उत्तमा सा तु विज्ञेया गुरुदत्तापि तत्समा ॥

अथ पार्थिवपूजा नन्दिपुराणे—

आयुष्मान्बलवान्श्रीमान्पुत्रवान्धनवान्सुखी ।
वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समर्चयेत् ॥
तस्मात्तु पार्थिवं लिङ्गं ज्ञेयं सर्वार्थसाधकम् ॥

तत्रैव—

*गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ।

इति लैङ्गात् । श्राद्धादि विष्णुशिवेतरपूजा न कार्येति केचित् । पूजा च भूतशुद्ध्यादिप्राणप्रतिष्ठादिकं कृत्वैव कार्या । तद्विस्तरोऽन्यत्र बोध्यः ।

*गोभू इति । मृदाहरणादिसप्तसु मन्त्रा अनुपदं बोध्याः ।

---

(१) 'योजनानि' क०

ज्ञेयो नमः शिवायेति मन्त्रः सर्वार्थसाधकः ॥
सर्वमन्त्राधिकश्चायमोङ्कारादयः षडक्षरः ।

भविष्ये—

पूर्तयोऽष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः ।
आग्नेय्यन्ताः प्रपूज्यास्तु वेद्यां लिङ्गे शिवं यजेत् ॥

अत्र-*'न प्राचीमग्रतः शंभोः' इति रुद्रयामले निषेधात् नान्तरालं प्राची, किन्तु *प्रसिद्धैव । तिथितत्त्वे देवीपुराणे—

*मृदाहरणसंघट्टं प्रतिष्ठाह्वानमेव च ।
स्नपनं पूजनं चैव विसर्जनमतः परम् ॥
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् ।
शिवः पशुपतिश्चैव महादेव इति क्रमः ॥

अन्योपचारेषु च पञ्चाक्षरः षडक्षरो वा मन्त्र इत्यर्थः, नामपन्त्रो वा बोध्यः । *न प्राचीमिति ।

देवाग्रे स्वस्य वाप्यग्रे प्राची प्रोक्ता गुरुक्रमैः ।

इत्यपि द्रष्टव्यम् । तथाच प्राचीमग्रतः कृत्वा संमुखीकृत्य शम्भोः पूजां न कुर्यात् । *प्रसिद्धैवेति । प्राच्यैशान्यादिक्रमेण वामावर्त्तेन, 'आग्नेय्यन्ता' इत्युक्तेः । केचित्तु उदीचीमग्रतः कृत्वा उदीच्यभिमुखीभूयेति । तस्मादन्तरालमेव प्राचीमाहुः । तन्न बहुसंमतम् । *मृदिति । 'ॐहराय नमः' इति मृदमाहृत्य संशोध्य तस्यां शुचि जलं प्रक्षिप्य 'ॐमहेश्वराय नमः' इति संघट्टनं कृत्वा तेन पिण्डेन लिङ्गं कुर्यात् । तच्चाशीतिरङ्गुलिकारूपाद्द्वादशाधिकपरिमाणमङ्गुष्ठादधिकोच्चं च । ततः 'ॐशूलपाणये नमः शिवेह सुप्रतिष्ठितो भव' इति प्रतिष्ठाप्य

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं

स्कान्दे—

शुष्काण्यपि च पत्राणि श्रीवृक्षस्य निवेदयेत् ।

तत्रैव भविष्ये—

धत्तूरकैश्च यो लिङ्गं सकृत्पूजयते नरः ।
स गोलक्षफलं प्राप्य शिवलोके महीयते ॥

योगिनीतन्त्रे—

शिवागारे झल्लकं च सूर्यागारे च शङ्खकम् ।
दुर्गागारे वंशवाद्यं म(२)धूरीं न च वादयेत् ॥

आद्यहेमाद्रौ स्कान्दे—

स्पृष्ट्वा रुद्रस्य निर्माल्यं सवा(३)सा आप्लुतः शुचिः ।

प्रयोगपारिजाते क्रियासारे—

मध्यमानामिकामध्ये घृष्टं संगृह्य पूजयेत् ।
अङ्गुष्ठतर्जन्यग्राभ्यां निर्माल्यमपनोदयेत् ॥

विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

इति ध्यात्वा 'पिनाकधृते नमः शिवेहागच्छ' इत्यावाह्य प(१)-ञ्चाक्षरेण पाद्यार्घ्याचमनीयानि दत्त्वा 'ॐपशुपतये नमः' इति शुद्धोदकेन संस्नाप्य आचमनीयवस्त्राचमनीययज्ञोपवीतगन्धपुष्पधूपदीपनैवेद्याचमनीयफलताम्बूलदक्षिणानीराजनप्रदक्षिणानमस्कारान् 'ॐनमः शिवाय' इति मन्त्रेण कुर्यात् । ततोऽष्टमूर्त्तिपूजां कुर्यात् । सा चेत्थम्—ॐशि(२)वाय क्षितिमूर्त्तये नमः' यथास्थितप्राच्याम्, 'ॐभवाय जलमूर्त्तये नमः' इत्यैशान्यां, 'ॐरुद्रायाग्निमूर्त्तये नमः' इत्युत्तरस्यां, 'ॐउग्राय वायुमूर्त्तये नमः' इति वायव्यां, 'ॐभीमायाकाशमूर्त्तये नमः' इति प्राच्यां, 'ॐपशुपतये यजमानमूर्त्तये नमः' इति नैर्ऋत्यां, 'ॐमहादेवाय सोममूर्त्तये नमः' इति दक्षिणस्यां,

---

(१) 'मधुरीं' क० (२) 'वाससा' ख० ग०
(३) 'नमः शिवाय' इत्यनेनेत्यर्थः ।
(४) 'ॐशर्वाय क्षितिपतये' घ०ङ० ।

अपनीतं च निर्माल्यं चण्डेशाय निवेदयेत् ।
अशून्यमस्तकं लिङ्गं सदा कुर्वीत पूजकः ॥

शूलपाणौ लैङ्गे—

वरं प्राणपरित्यागः शिरसो वापि कर्तनम् ।
न चैवापूज्य भुञ्जीत शिवलिङ्गे महेश्वरम् ॥
सूतके मृतके चैव न त्याज्यं शिवपूजनम् ॥

तिथितत्त्वे लैङ्गे—

विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोपि महादेवो न स्यात्तस्य फलप्रदः ॥
तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुण्ड्रकम् ॥

रुद्राक्षधारणे विशेषः शिवहरस्ये—

एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ।
अवध्यत्वं प्रतिस्रोतो वह्निस्तम्भं करोति च ॥
द्विवक्त्रो हरगौरी स्याद्गोवधाद्यघनाशकृत् ।
त्रिवक्त्रो ह्यग्निजन्माऽथ पापराशिं प्रणाशयेत् ॥

'ॐईशानाय सूर्यमूर्त्तये नमः' इत्याग्नेय्याम् । ततः स्तोत्रादिना स्तुत्वा त्रिः पुष्पाञ्जलिं समर्प्य नत्वा क्षमस्वेति संप्रार्थ्य 'ॐमहादेवाय नमः' इति विसर्जयेदिति । शिवपूजायां विशेषः—

आपः क्षीरं कुशाग्राणि दध्यक्षतमधुतण्डुलाः ।
सिताश्च सर्षपाश्चैव अर्घ्योऽष्टाङ्गः प्रकीर्त्तितः ॥
जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनैः ।
तमालागुरुकर्पूरैः शांभवं चाष्टगन्धकम् ॥
तुलसीबिल्वनिर्गुण्डीजम्बूराम्रवणं तथा ।
पञ्चबिल्वमिति प्रोक्तमर्चयेदिन्दुशेखरम् ॥
गुग्गुलं घृतसंयुक्तं शिवे धूपं निवेदयेत् ।
दधित्थं घृतसंयुक्तं दद्याद्बिल्वमथापि वा ॥

चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति ।
पञ्चवक्त्रस्तु कालाग्निरगम्यामक्ष्यपापनुत् ॥
षड्वक्त्रस्तु गुहो ज्ञेयो भ्रूणहत्यादि नाशयेत् ।
सप्तवक्त्रस्त्वनन्तः स्यात्स्वर्णस्तेयादिपापहृत् ॥
विनायकोऽष्टवक्त्रः स्यात्सर्वानृतविनाशकृत् ।
भैरवो नववक्त्रस्तु शिवसायुज्यकारकः ॥
दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतभयापहः ।
एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥
द्वादशास्यस्तथादित्यः सर्वरोगनिबर्हणः ।
त्रयोदशमुखः कामः सर्वकामफलप्रदः ॥
चतुर्दशास्यः श्रीकण्ठो वंशोद्धारकरः परः ॥ इति ।

दीपादिकं प्रागुक्तं प्रतिष्ठायामिति । प्रतिष्ठा च स्मृत्यन्तरे—

प्रक्षाल्य गन्धतोयेन पञ्चगव्येन चोपरि ।
शिवाम्भसापि प्रक्षाल्य श्रीरुद्रेणाभिषेचयेत् ॥
रुद्राक्षाणां प्रतिष्ठेयमेवं वैदिकसंमता ।
अथवा वैदिकमते प्रतिष्ठा नैव विद्यते ॥

नारदीये—

शिवप्रदक्षिणे मर्त्यः सोमसूत्रं न लङ्घयेत् ।

प्रदक्षिणाप्रकारस्तु—

वृषं चण्डवृषं चैव सोमसूत्रं पुनर्वृषम् ।
चण्डं च सोमसूत्रं च पुनश्चण्डं पुनर्वृषम् ॥

सोमसूत्रप्रमाणं यथा—

प्रासादविस्तारसमानसूत्रं सोमस्य सूत्रं दिशि सोमसूत्रम् ।
सूत्राद्बहिर्लङ्घनतो न दोषः स्यादोष आभ्यन्तरलङ्घनेन ॥

लिङ्गावधिकं यावत् प्रासादभित्ति सोमस्य दिशि उत्तरस्यां दिशि सूत्रं सोमस्य सूत्रं सन्न लङ्घयेत् । तदग्रे तल्लङ्घने न दोष इत्यर्थः ।

तथा—

विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकान्घोरान्यावदिन्द्राश्चतुर्दश ॥
पञ्चामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत् ।
रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा ॥
त्र्यम्बकादिकमन्त्रं च तथा तत्र प्रयोजयेत् ॥
यद्वा 'ॐ अघोर ॐ ह्रैं अघोरतर ॐ ह्रौं ह्रां नमस्ते रुद्ररूपाय ह्रैं स्वाहा' अनेनाभिमन्त्र्य धारयेत् । तथा—

अष्टोत्तरशतं कार्या चतुःपञ्चाशदेव वा ।
सप्तविंशतिमाना वा ततो हीनाधमाः स्मृताः ॥

प्रजापतिः—

मोक्षार्थी पञ्चविंशत्या धनार्थी त्रिंशता जपेत् ।
पुष्ट्यर्थी पञ्चविंशत्या पञ्चदश्याभिचारिके ॥
सप्तविंशतिरुद्राक्षमालया देहसंस्थया ।
यत्करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् ॥
यो ददाति द्विजेभ्यश्च रुद्राक्षं भुवि सन्मुखम् ।
तस्य प्रीतो भवेद्रुद्रः स्व(१)पदं च प्रयच्छति ॥ इति ।

पदार्थादर्शे बोपदेवः—

रुद्राक्षान्कण्ठदेशे दशनपरिमितान्मस्तके विंशती द्वे
षट् षट् कर्णप्रदेशे करयुगलकृते द्वादश द्वादशैव ।
बाह्वोरिन्दोः कलाभिर्नयनयुगकृते एकमेकं शिखायां
वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः ॥

हेमाद्रौ शिवधर्मे—

स्नानं पलशतं ज्ञेयमभ्यङ्गः पञ्चविंशतिः ।
पलानां द्वे सहस्रे तु महास्नानं प्रकीर्तितम् ॥
पञ्चविंशत्पलं लिङ्गे अभ्यङ्गं कारयेदथ ।

(१) 'स्वपदे' ग०

शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन च ॥
तावता मधुना चैव दध्ना चैव ततः पुनः ।
तावतैव च क्षीरेण गव्येनैव भवेत्ततः ॥
भूयः सार्धसहस्रेण पलानामैक्षवेण च ।
रसेन कारयेत्स्नानं भक्त्या चोष्णाम्बुना ततः ॥

विष्णवादौ तु स्कान्दे--

क्षीराद्दशगुणं दध्ना घृतेनैव दशोत्तरम् ।
घृताद्दशगुणं क्षौद्रं क्षौद्राच्चैक्षवजं तथा ॥

ब्राह्मे--

देवानां प्रतिमा यत्र घृताभ्यङ्क्तमा भवेत् ।
पलानि तत्र देयानि श्रद्धया पञ्चविंशतिः ॥

इदं क्रोडीकृताभिप्रायेण । तत्रैव संग्रहे—

विष्वक्सेनाय दातव्यं नैवेद्यस्य शतांशकम् ।
पादोदकं प्रसादं च लिङ्गे चण्डेश्वराय तु ॥

पञ्चायतनसंनिवेशमाह बोपदेवः पदार्थादर्शश्च —

शंभौ मध्यगते हरीनहरभूदेव्यो हरौ शंकरे-
भास्येनागसुतारवौ हरगणेशाजाम्बिकाः स्थापिताः ।
देव्यां विष्णुहरेभवक्त्ररवयो लम्बोदरेऽजेश्वरे-
नाम्बाः शंकरभागतोऽतिसुखदा व्यस्तास्तु हानिप्रदाः ॥

शंकरभागतः ईशानकोणादारभ्य प्रदक्षिणमित्यर्थः ।

*अत्र दिक्स्वरूपमुक्तं प्रयोगपारिजाते मन्त्रशास्त्रे—

देवस्य मुखमारभ्य दिशं प्राचीं प्रकल्पयेत् ।
तदादि परिवाराणामङ्गाद्यावरणस्थितिः ॥

---

*अत्रेति । पञ्चायतनसन्निवेशे इत्यर्थः ।

यत्रैव भानुस्तु वियत्युदैति प्राचीति तां वेदविदो वदन्ति ।

इत्युक्ता प्राची न ग्राह्येत्यभिप्रायः । अत्र वदन्ति—इयं प्राच्ची तान्त्रिकपूजायामेव न वैदिकपूजायां, तस्यां तु प्रसिद्धैव आवरणा-

तत्र क्रमः पाद्मे—

*रविर्विनायकश्चण्डी ईशो विष्णुस्तु पञ्चमः ।
अनुक्रमेण पूज्यन्ते व्युत्क्रमे तु महद्भयम् ॥

द्यभावात् । पञ्चायतनसंनिवेशेऽपि प्रसिद्धैव प्राची नतु पूज्यपूजकमध्यरूपेति । *रविरिति पौराणः प्रकारः । तान्त्रिकस्तु पञ्चानां मध्ये मुख्यस्यावाहनादिनमस्कारान्तं पूजाकाण्डं समाप्य अन्यस्येत्येवं काण्डानुसमयः ।

मुख्ये पुष्पाञ्जलिं दत्त्वा गणेशाद्यर्चनं भवेत् ।
गणेश एव मुख्यश्चेत्तत्र सूर्यक्रमाद्भवेत् ॥

इति क्रमाभिधानात् । मुख्ये प्रधानदेवतायां पुष्पाञ्जल्यन्तपूजाकाण्डं समाप्य पदार्थानुसमयेन गणेशादीनर्चयेदित्यर्थः । शारदातिलकटीकायां पुष्पाञ्जल्यन्तरमादौ विधीयते इत्युक्तम् । अत्र पक्षान्तरे मुख्यत्वोक्त्या देवतान्तरस्याङ्गत्वं लभ्यते । एवञ्चाङ्गप्रधानपूजयोरेककालीनत्वं सिद्ध्यति । तथाच सर्वेषामावाहनं ततः स्थापनमिति पदार्थानुसमय एव । ततः मुख्ये मध्ये पुष्पाञ्जल्यन्तां पूजां कृत्वाऽङ्गदेवतापूजा कार्येति । एतत्पक्षद्वयमपि तान्त्रिकपूजायामेव तत्रैवोक्तत्वात् । वैदिकपूजायां स्थापनक्रम एव ।

गणार्कौ (तु)समभ्यर्च्य शैवो विष्णुं प्रपूजयेत् ।
अर्चयेच्च शिवं पश्चाच्छिवमादौ तु वैष्णवः ।
ततो विष्णुं ततो दुर्गामेवं स्यादर्चनक्रिया ॥

अत्र गणेशार्कयोः क्रमे न तात्पर्यं, किन्तु तावपूजयित्वा प्रधानं न पूज्यमित्यत्र । आदौ न सर्वादौ किन्तु विष्ण्वादौ । पौराणोऽयं क्रमः । आगमोक्तस्तु योगिनीतन्त्रे—

गणेशसूर्यविष्ण्वीशदुर्गा आवाह्य पूजयेत् । इति ।

अत एव विष्णुशिवगणेशसूर्यदुर्गाभ्यो नम इत्यादि श्लिष्टमन्त्र एव विष्णुपञ्चायतने वाजपेययाजिभिरुक्तः । सूर्यातिरिक्तपञ्चायतनपूजापि आदौ सूर्यपूजां कृत्वैव कार्या,

तथा—

पूज्यपूजकयोर्मध्ये प्राची प्रोक्ता विचक्षणैः ॥

अथ केशवादिमूर्तयः । बोपदेवः—

केविगोवादापुङ्गपेप्रजाच्युकृममात्रिना ।

वाऽधोनृहसानिश्रीपा शाचगे वि गपे चपे ॥

अत्र केविगवित्याद्यैः केशवविष्ण्वादिचतुर्विंशतिमूर्तयोऽभिधीयन्ते । शात् शङ्खात् चगे चक्रगदे ज्ञेये इत्यर्थः । शिष्टे भुजे पद्मं त्वर्थतः सिद्धम् । अत्र दक्षि-(१)णोर्ध्वकरक्रमेण ज्ञेयम्, 'दक्षि(१)णोर्ध्वकरक्रमात्' इति हेमाद्रौ वचनात् तेन हेमाद्रिणा संवादः । विशब्देन विपरीतं गचे इत्यर्थः । अत्रापि (२)शादित्यनुवृत्तिः । शङ्खाद्गदाचक्रे इत्यर्थः । गपे इत्यत्रापि शादनुवर्तते । शङ्खाद्गदापद्मे इत्यर्थः । विपरीते पद्मगदे इत्यत्रापि शङ्खाज्ज्ञेये । चपे चक्रपद्मे । शङ्खाच्चक्रपद्मे इत्यर्थः । वि इति अत्रापि, पद्मचक्रे इत्यर्थः । तेन(३)चगे इत्यष्टौ मूर्तयः । गपे इत्यष्टौ मूर्तयः । चपे इत्यत्र च । अत्र *मूलं हेमाद्रौ ज्ञेयम् ।

प्रातःसध्यावसाने तु नित्यं सूर्यं समर्चयेत् ।

इति वचनात्,

अपूज्य प्रथमं सूर्यमपरान् यः प्रपूजयेत् ।

न तद्भूतकृतं पाद्यं संप्रतीक्षन्ति देवताः ॥

इति ब्राह्माच्च ।

*मूलमिति ।

शंखचक्रगदाब्जतः केशवः सूर्यसप्रभः ।

(इतः युक्तः)

---

(१) 'दक्षिणाधः क' ख० (२) 'अत्रापि शब्दादनु' ख०

(३) 'तेन च गदे' ख०

कञ्जकम्बुचक्रगदायुतो विष्णू रविप्रभः ॥
गदाब्जशंखचक्रेतो गोविन्दो भास्करद्युतिः ।
वामनोऽरिगदापद्मशंखेतो रविसुप्रभः ॥
दामोदरः शंखगदाचक्रपद्मार्कसप्रभः ।
पद्मशंखगदाचक्रो सूर्याभः पुरुषोत्तमः ॥
सारिपद्मः शंखगदो हृषीकेशोऽर्कसप्रभः ।
उद्यदर्कनिभोपेन्द्रो गदाचक्राब्जशंखयुक् ॥
प्रद्युम्नो रविभः शंखगदाब्जारिधरो विभोः ।
जनार्दनश्चक्रशंखगदाब्जेतो रविप्रभः ॥
सूर्याभोऽच्युतनामाब्जचक्रशंखगदायुधः ।
उद्यदर्कनिभः कृष्णो गदापद्मारिशंखभृत् ॥
सशंखाब्जगदाचक्रः सूर्याभो मधुसूदनः ।
माधवश्चक्रशंखाब्जगदेतो रविसुप्रभः ॥
त्रिविक्रमो गदाचक्रशंखपद्मो रविप्रभः ।
नारायणः साब्जगदाचक्रशंखो रविप्रभः ॥
शंखचक्रे पद्मगदे वासुदेवो रविद्युतिः ।
रविप्रभो गदाशंखचक्राब्जेतो ह्यधोक्षजः ॥
नृसिंहः सूर्यभः पद्मगदाशंखादिसंयुतः ।
सारिपद्मगदाशंखो हरिः प्रद्योद्रविप्रभः ॥
शंखाब्जारिगदासूर्यप्रभः संकर्षणो विभुः ।
अनिरुद्धो गदाशंखपद्मचक्री रविप्रभः ॥
श्रीधरोऽरिगदाशंखपद्मेतोऽर्कसमद्युतिः ।
पद्मनाभः साब्जचक्रगदाशंखोऽजसन्निभः ॥ इति ।

श्रीक्रमेणापि यथा खिकेदानचीमाढगनाविधिंमत्रिढंजीवजश्री-र्द्धेहृथिंपणादासद्याखींहृधीप्रानिटींतिंपुंटादौनृदंथाच्युचिंजोपटींहानि-ञ्जठाकु ॥ अस्यार्थः शंखचक्रगदापद्मानि भवतो धार्याणि । तेषां क्रमेण अआइईसंज्ञाः । एवं शंखस्य कखगघेति चत्वारो वर्णाः संज्ञाः ।

अथ बौधायनसूत्रं त्रैविक्रमीं चानुसृत्य लिङ्गार्चा-प्रतिष्ठोच्यते—'यजमानः पूर्वोक्तकाले पूर्वेद्युः दशद्वादशषोडशान्यतरहस्तं मण्डपं कृत्वाऽऽग्नेये हस्तमात्रं चतुरस्रं कुण्डं स्थण्डिलं वा पूर्वतो हस्तमात्रां वेदीं नैर्ऋते वा(१)स्तुमण्डपं मध्ये वेदीं तदुपरि सर्वतोभद्रं कृत्वा प्राणानायम्यास्यां मूर्तौ लिङ्गे(२) वा देवस्य सान्निध्यसिद्ध्यर्थं दीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्यसुखकामोऽमुकमूर्तिंप्रतिष्ठां करिष्ये इति सङ्कल्प्य गणेशपूजनपुण्याहवाचनमातृकापूजननान्दीश्राद्धानि कृत्वाचार्यं चतुर ऋत्विजश्च वृत्वा वस्त्राद्यैः पूजयेत्। अथाचार्यो यदत्र संस्थितमिति सर्षपान् विकीर्यापोहिष्ठेति कुशोदकेन भूमिं प्रोक्ष्य देवा आयान्तु, यातुधाना अपयान्तु, विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कृत्वाऽस्मत्कृततुलापद्धतिमार्गेण मण्डपप्रतिष्ठां कृत्वाऽकृत्वा वा पूर्वरात्रौ हिरण्योपधानं देवं पञ्चगव्यहिरण्ययवदूर्वाश्वत्थपलाशपर्णान्युदकुम्भे प्रक्षिप्य ताभिरद्भिरापोहिष्ठेति तिसृभिर्हिरण्यवर्णा इति चतसृभिः पवमानःसुवर्जन इ-

---

चक्रस्य चछजझेति। गदायाः टठडढेति। पद्मस्य तथदधेति। एवञ्च खिके इत्यादौ प्रथमैः कचटतैः प्रथमः शंखः, द्वितीयैः खछठथैः द्वितीयं चक्रं, तृतीयैः गजडदैः तृतीया गदा, चतुर्थैः घझढधैश्चतुर्थं पद्ममिति च ऊर्ध्वं दक्षिणकरक्रमेण विन्यासात्केशवादिमूर्त्तयः। अथार्थः—खिके खं शंखः संज्ञात्वात्, खश्चक्रं द्वितीयत्वात्, ईगदा संज्ञात्वात्, शिष्टं पद्ममर्थलभ्यम्, केशवः। दानः दः पद्मं संज्ञात्वात्, दः गदा तृतीयत्वात्, आ चक्रं संज्ञात्वात्, शिष्टः शंखः, नारायणः एवं क्रमेण चीमा इत्यादेरर्थः कार्यः।

---

(१) 'मण्डलमध्ये' ख० 'मण्डलं मध्ये' क०

(२) 'लिङ्गेवा' नास्ति ख०

त्यनुवाकेनाभिषिच्य व्याहृतिभिरिदंविष्णुरिति फलय-
वदूर्वाः समर्प्य(१)नमस्ते रुद्रमन्यव इति रुद्रे ततो रक्षो-
हणमिति हस्ते कङ्कणं बद्धा वाससाच्छाद्य अवतेहेड
उदुत्तममिति जलेऽधिवासयेत्' । इदं बौधायनोक्तम् ।

ततश्चलिङ्गे अर्चायां वा अत्राग्निं प्रतिष्ठाप्य गो-
क्षीरे नीवारचरुं कृत्वा विष्णुश्चेत् कृसरमपि श्रपयित्वा-
ऽऽज्यभागान्ते पलाशोदुम्बराश्वत्थशम्यपामार्गसमि-
द्भिः आज्येन चरुणा तिलैर्वा प्रत्येकमष्टाविंशतिमष्टौ वा-
ऽऽहुतीर्लोकपालमूर्तिपतिभ्यो हुत्वा स्थाप्य देवमन्त्रेण पू-
र्वोक्तसमित्तिलनैवारचर्वाज्यैरष्टसहस्रमष्टशतमष्टाविंश-
तिं वा हुत्वा 'अग्निर्यजुर्भिः' इत्यनुवाकेन दशाहु-
तीर्जुहुयात् । प्रतिद्रव्यहोमान्ते देवं पादनाभिशिरस्सु
स्पृशेत् । आज्यहोमे चोत्तरतः मजलकुम्भे संपातान्न-
येत् । तेषां मन्त्राः–इन्द्रायेन्दो इ
वीमूर्तेः, अघोरेभ्य इति तत्पतेः, शर्वस्य
हीत्यग्नेः, अग्निं दूतमित्यग्निमूर्तेः, न(१)म
पशुपतये चेति पशुपतेः, यमाय सोमं
असि हि वीरिति यजमानमूर्तेः, स्तुहि श्रुत तत्पतेः उ-
ग्रस्य, असुन्वन्तं निर्ऋतेः, आकृष्णेन सूर्यमूर्तेः, यो
रुद्रो अग्नौ इति तत्पते रुद्रस्य, इमं मे वरुणस्य, शं-
नो देवी जलमूर्तेः, नमो भवायेति भवस्य, आनो नि-
युद्भिरिति वायोः, वात आ वातु वायुमूर्तेः, तमी-
शानं तत्पतेरीशानस्य, आप्यायस्वेति कुबेरस्य, वयं-
सोमेति सोममूर्तेः, तत्पुरुषाय महादेवस्य, अभित्वा
ईशानस्य, आदित्प्रत्नस्येत्याकाशस्य, नम उग्राय चेति
तत्पतेर्भीमस्य । ततो देवस्य पादौ स्पृशेत् । एवं द्वितीये

(१) 'नमस्ते रुद्रमन्यव इति रुद्रे ततो' नास्ति ख० ग०
(१) 'नमः शिवाय' क० ।

हुत्वा नाभिं, तृतीये मध्यं, चतुर्थे उरः, पञ्चमे शिरः स्पृष्ट्वा प्रतिपर्यायं संपातजलेन देवमभिषिञ्चेत । ततः स्विष्टकृदादिहोमशेषं समाप्यार्चां शोधयेत् । स्थिरलिङ्गार्चादौ तु नेदानीमग्निस्थापनहोमादि कार्यम् ।

ततो देवं नत्वा—

स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते ।
शुद्धेऽपि त्वदधिष्ठाने शुद्धिं कुर्मः सहस्व ताम् ॥

इति संप्रार्थ्य 'उत्तिष्ठ ब्रह्मणस्पते' इति सर्विगुत्थाप्य पूर्वमकृतेऽन्युत्तारणे अधुना वा कार्यम् 'अग्निःसप्तिम्' इति सूक्तमग्निपदहीनं पठित्वा तत्सहितं पुनः पठेत् । एवमष्टसहस्रमष्टशतमष्टाविंशति वा पठन् जलं पातयेत् । ततोऽर्चां द्वादशवारं मृदा जलेन च प्रक्षाल्य मन्त्रवत्पञ्चगव्यं कृत्वा 'पयः पृथिव्याम्' 'आवोराजानम्' इति च संस्नाप्य 'आप्यायस्व' 'दधिक्राव्णः' 'तेजोसि' 'मधुवाता' 'आपं गौः' इति पञ्चामृतैः संस्नाप्य लिङ्गं चेत् 'नमस्ते रुद्र मन्यवे' इत्यष्टाभिः संस्नाप्य घृतेनाभ्यज्योद्वर्तनेनोद्वर्त्योष्णोदकेन प्रक्षाल्य गन्धं दत्त्वा संपातोदकेनाभिषिच्य सपल्लवैश्चतुर्भिः कुम्भैः 'आपोहिष्ठा' इति त्रिभिः 'आकलशेषु' इति च प्रत्येकं, 'समुद्रज्येष्ठा' इति चतुर्भिः 'आकलशेषु' इति च मिलितैः संस्नाप्यौदुम्बरादिपीठेऽर्चामुपवेश्य परितोऽष्टादिक्षु सजलकुम्भान्संस्थाप्य तेषु गन्धपुष्पदूर्वाः क्षिप्त्वा आद्ये सप्तमृदः, द्वितीये पुष्करपर्णशमीविकङ्कताश्मन्तकत्वचः पल्लवाश्च, तृतीयादिषु सप्तधान्यं पञ्चरत्नफलपुष्पाणि कुशदूर्वागोरोचनसम्पातोदकगन्धफलसर्वौषधीः क्षिप्त्वा क्रमेण 'आपोहिष्ठा' इति तिसृभिः 'हिरण्यवर्णाः' इति चतसृभिः पवमानानुवाकेन चाभिषिच्यैककुम्भे

शमीपलाशवटखदिरबिल्वाश्वत्थधिकङ्कतपनसाम्रशिरीषोदुम्बराणां पल्लवान् कषायांश्च क्षिप्त्वा 'अश्वत्थेवः' इत्यभिषिच्य पञ्चरत्नोदकेन 'हिरण्यवर्णाः' इति संस्राप्य

'हिरण्यगर्भः'

सी' 'आपो ह यत्' 'यश्चिदापो' इत्यष्टौ पिष्टदीपान् दत्त्वा सुवर्णशलाकया तैजसपात्रस्थं मधु घृतं च गृहीत्वा 'चित्रं देवानां' 'तेजोसि' इति मन्त्राभ्यां

ॐ नमोभगवते तुभ्यं शि(१)वाय हरये नमः ।
हिरण्यरेतसे विष्णो विश्वरूपाय ते नमः ॥

इति च दक्षिणसव्ये देवनेत्रे मन्त्रावृत्त्या लिखेत् । 'अञ्जन्ति त्वा' इत्यञ्जनेन मधुना वाऽङ्क्त्वा 'देवस्य त्वा सवितुः प्र(२)सवे० इन्द्रस्येन्द्रियेणानञ्मि' इति मध्वाज्यशर्कराभिरङ्क्त्वा तेनैवाञ्जनेन पुनरञ्जयेत् । स्थिरलिङ्गे तु स्वर्णसूच्या गन्धेन । 'ॐ नमो भगवते रुद्राय हिरण्यरेतसे पराय परमात्मने विश्वरूपायोमाप्रियाय नमः' इत्यञ्जनादिनाऽञ्जयेत् । ततः आदर्शभक्ष्यादि दर्शयेत् । ततः कर्ता आचार्याय गामृत्विग्भ्यश्च दक्षिणां दद्यात् । अथाचार्यः प्रत्यृचमादौ प्रणवं वदन् पुरुषसूक्तेन स्तुत्वा वंशपात्रे पंचवर्णौदनेन देवस्य नीराजनं कारयित्वा रुद्राय चतुष्पथादौ दद्यात् । मन्त्रस्तु-'ॐ नमो रुद्राय सर्वभूताधिपतये दीप्तशूलधरायोमादयिताय विश्वाधिपतये रुद्राय वै नमो नमः शिवमगर्हितं कर्मास्तु स्वाहा' इति । अश्वत्थपर्णे भूतेभ्यो नम इति । केचिदेतद्रात्रौ स्थिरप्रतिष्ठायामिच्छन्ति ।

अथाचार्यः सर्वतोभद्रे देवानावाहयेत् । मध्ये ब्र-

(१) 'हराय हरये' क०
(२) 'प्रसवे० इन्द्रस्येन्द्रियेणानञ्मि' ना०स्त ।

ह्माणम्, पूर्वादिदिक्षु इन्द्रादिलोकपालान्, ईशानेन्द्राद्यन्तरालेषु वसून् रुद्रान् आदित्यान् अश्विनौ विश्वान्देवान् पितॄन् स्कन्दवृषौ, ब्रह्मेशानाद्यन्तरालेषु दक्षं विष्णुं दुर्गां स्वधाकारं मृत्युरोगान् समुद्रान् सरितः मरुतः गणाधिपं चेति। मध्ये एव पृथिवीं मेरुं संस्थाप्य देवं चावाह्य प्रागादि वज्रं शक्तिं दण्डं खड्गं पाशम् अङ्कुशं गदां शूलं, तद्बाह्ये गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वसिष्ठम् अत्रिम् अरुन्धतीं च, तद्बाह्ये नवग्रहान्, तद्बाह्ये ऐन्द्रीं कौमारीं ब्राह्मीं वाराहीं चामुण्डां वैष्णवीं माहेश्वरीं वैनायकीमित्येताः नामभिरावाह्य सम्पूज्य अर्चायां देवं तन्मन्त्रेणावाह्य मण्डलमध्येऽर्चां 'सुप्रतिष्ठो भव' इति निवेश्य संपूज्य वह्नौ मण्डलदेवतानां नामभिस्तिलाज्येन दशदशाहुतीर्हुत्वा पुष्पाञ्जलिं समर्प्य 'नमो महत्०' इति देवं नत्वा मण्डलादुत्तरतः स्वास्तिके मञ्चकं तदुपरि शय्यां कृत्वा 'उत्तिष्ठ' इति देवमुत्थाप्य मङ्गलघोषैः शय्यायां देवमारोप्य पुरुषसूक्तोत्तरनारायणाभ्यां स्तुत्वा देवे न्यासं कुर्यात्। तद्यथा—पुरुषात्मने नमः, प्राणात्मने०, प्रकृतितत्त्वाय०, बुद्धितत्त्वाय०, अहंकारतत्त्वाय०, मनस्तत्त्वाय० इति सर्वाङ्गे। प्रकृतितत्त्वाय०, बुद्धितत्त्वाय० हृदि। शब्दतत्त्वाय० शिरसि। स्पर्शतत्त्वाय० त्वचि। रूपतत्त्वाय० हृदि। एवं हृद्येव रसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थपृथिव्यप्तेजोवाय्वाकाशसत्त्वरजस्तमोदेहतत्त्वानि विन्यसेत्। ततः पुरुषसूक्तस्याद्यमृग्द्वयं करयोः, तदुत्तरं जान्वोः, तदुत्तरं कट्योः, 'तं यज्ञम्' इति तिस्रः नाभिहृत्कण्ठेषु, 'तस्मादश्वा' इति द्वयं बाह्वोः, 'ब्राह्मणोस्य' इति द्वयं नासयोः, 'नाभ्या' इति द्वयमक्ष्णोः, अन्त्यां शिरसि। केचित्तत्त्वन्यासमन्य-

था आहुः । पुरुषप्रकृतिमहदहंकारतत्त्वानि, शब्दस्पर्श-रूपरसगन्धतन्मात्राणि, आकाशवायुतेजोऽप्पृथिवीश्रोत्रत्वक्चक्षुरसनाघ्राणवाक्पाणिपादपायूपस्थमनस्तत्त्वानीति । केचिदेतानि स्थिरलिङ्गादावेवेच्छन्ति । ततः 'सुखशायी भव' इति शय्यायां देवं स्वापयित्वा मण्डलशय्ययोरन्तराले न गन्तव्यमिति प्रैषं दत्त्वा स्विष्टकृदादिहोमशेषं समाप्य मण्डलदेवताभ्यो नामभिः पायसेन चरुणा वा बलीन्दद्यात्, नीवारचरुशेषेण दिग्बलिम् । नेदं स्थिरप्रतिष्ठायाम् । स्थिरलिङ्गार्चादौ त्वयं विशेषः-'अग्निस्थापनहोमवर्ज्यं सर्वं पूर्ववत्कृत्वा इदानीमग्निस्थापनं कृत्वा पूर्वोक्तहोमं कुर्यात् । नात्र नैवारश्चरुः । विष्णुश्चेत्पूर्वोक्तहोमं कृत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं हुत्वा 'इदं विष्णुः' इति पादौ स्पृष्ट्वा पुनस्ता एव हुत्वा 'विष्णोर्नुकम्' इति नाभिं (१)स्पृष्ट्वा पुनस्ता एव हुत्वा 'अतो देवा' इति शिरः स्पृष्ट्वा पुनस्ता एव हुत्वा पुरुषसूक्तेन सर्वाङ्गं स्पृशेत् । स्थिरलिङ्गं चेदग्निस्थापनादि पूर्वोक्तसमिदाज्यतिलाहुतीर्हुत्वा 'या त इषुः' इत्यनुवाकान्तेन 'द्रापे' 'सहस्राणि' इत्यनुवाकाभ्यां च प्रत्यृचमाज्यं हुत्वा 'सर्वो वै रुद्रः' इति मूलं स्पृशेत् । पुनस्ता एव हुत्वा 'कद्रुद्राय' इति मध्यम्, पुनस्ता एव हुत्वा 'नमो हिरण्यबाहवे' इत्यग्रम्, पुनस्ता एव हुत्वा सर्वरुद्रेण सर्वाङ्गं स्पृशेत् । ततो 'धामन्त' इति पूर्णाहुतिं जुहुयान्न वा । एवमधिवासनं कृत्वा परेद्युः सद्यो वा पीठिकां स्नापयित्वा 'महीमूषु' इत्यावाह्य 'अदितिर्द्यौः' इति स्तुत्वा 'ह्रीं नमः' इति संपूज्य तेनैव पूर्णाहुतिं हुत्वा 'उत्तिष्ठ ब्रह्मणस्पते' इति देवमुत्थाप्य पुष्पा-

ञ्जलिं दत्त्वा पुरुषसूक्तेन स्तुत्वा 'उदुत्यम्' इत्युत्थाप्य 'कनिक्रदत्' इति सूक्तेन विष्णुं 'सद्योजातम्' इति पञ्चानुवाकैर्लिङ्गं गृहं प्रवेश्य पीठिकायाम् इन्द्रादिनामभिरष्टरत्नानि क्षिप्त्वा सप्तधान्य(१)रूप्यवृषमनःशिलाः क्षिप्त्वा पायसेन संलिप्य प्रणवेनाङ्गन्यासं कृत्वा सुवर्णशलाकामन्तरितां कृत्वा सुलग्ने 'ॐ प्रतितिष्ठ परमेश्वर' इत्युक्त्वा 'अतो देवा' इति विष्णुं रुद्रेण च लिङ्गं स्थापयेत् । ततः प्राणप्रतिष्ठा ।

चलार्चादौ त्वधिवासनान्ते परेद्युः 'उत्तिष्ठ ब्रह्मणस्पते' इति देवमुत्थाप्य पुरुषसूक्तोत्तरनारायणाभ्यां स्तुत्वा घृते व्रीहिचरुं कृत्वा तदेवतामन्त्रेण दशाहुतीर्हुत्वा नामभिर्जुहुयात् । अग्नये स्वाहा, सोमाय स्वाहा, धन्वन्तरये स्वाहा, कुह्वै स्वाहा, अनुमत्यै स्वाहा, प्रजापतये स्वाहा, परमेष्ठिने स्वाहा, ब्रह्मणे स्वाहा, अग्नये स्वाहा, सोमाय स्वाहा, अग्नयेऽन्नादाय स्वाहा, अग्नयेऽन्नपतये स्वाहा, प्रजापतये स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, सर्वेभ्यो देवेभ्यः स्वाहा, भूर्भुवःस्वः स्वाहा, अग्नये स्विष्टकृते इति । ततः 'सप्त ते अग्ने' 'पुनस्त्वा' इत्वाभ्यां पूर्णाहुतिः । तत आचार्यो 'या ओषधीः' इति पुष्पफलसर्वौषधीः समर्प्य संपातोदकं (२)ताम्रपात्रे आदाय देवमन्त्रेण शतवारमभिमन्त्र्य तेनैवाभिषिञ्चेत् । ततः 'उत्तिष्ठ' इति देवमुत्थाप्य 'विश्वतश्चक्षुः' इत्युपस्थाय देवं ध्यात्वा जपेत् । ब्रह्मणे नमः । एवं विष्णवे० रुद्राय० इन्द्रादीन् अष्टौ वसुभ्यो रुद्रेभ्य आदित्येभ्योऽश्विभ्यां मरुद्भ्यः कुबेराय गङ्गादिमहानदीभ्योऽग्नीषोमाभ्यामिन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये

(१) 'वृष' नास्ति क० । (२) 'ताम्रपात्रे' नास्ति क० ।

सर्वेशाय विश्वेभ्योदेवेभ्यो ब्रह्मणे नम इति। ततः संपातोदकेन यजमानमभिषिच्य देवं ध्यात्वा 'ॐप्रतितिष्ठ परमेश्वर' इति पुष्पाञ्जलिं निवेद्य सच्चिदानन्दं ब्रह्मैव भक्तानुग्रहाय गृहीतविग्रहं करचरणाद्यवयविनं शङ्खचक्राद्यायुधवन्तं निजवाहनाद्युपेतं निजहृत्कमलेऽवस्थितं सर्वलोकसाक्षिणमणीयांसं 'परमेष्ठ्यासि परमां श्रियं गमय' इति मन्त्रेण पुष्पाञ्जलावागतं विभाव्यार्चायां विन्यस्य प्राणप्रतिष्ठां कुर्यात्।

यथा-अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः, ऋग्यजुःसामानि छन्दांसि, क्रियामयवपुःप्राणाख्या देवता, आं बीजम्, क्रों शक्तिः, प्राणप्रतिष्ठायां विनियोगः। तत ऋष्यादीन् क्रमेण शिरोमुखहृदयगुह्यपादेषु विन्यस्य ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवायवाकाशात्मने आं हृदयाय नमः। ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा। ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्। ॐ तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम्। ॐ पं फं बं भं मं ओं वचनादानविहरणोत्सर्गानन्दात्मने औं नेत्रत्रयाय वौषट्। ॐ यं रं लं वं शं षं सं हं ळं क्षं अं मनोबुद्ध्यहंकारचित्तात्मने अः अस्त्राय फट्। एवम् आत्मनि देवे च कृत्वा देवं स्पृष्ट्वा जपेत्-ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य प्राणा इह प्राणाः। ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य जीव इह स्थितः। ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य सर्वेन्द्रियाणि। ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठन्तु स्वाहेति। ततोऽर्चाहृद्यङ्गुष्ठं द-

त्वा जपेत्—

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कञ्चन ॥ इति ।

ततः प्रणवेन संरुध्य सजीवं ध्यात्वा 'ध्रुवा द्यौः' इति तृचं जप्त्वा कर्णे गायत्रीं देवमन्त्रं च जप्त्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरःसु स्पृष्ट्वा 'इहैवैधि' इति त्रिर्जपेत् । ततः कर्ता—

स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः ।
प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय ॥
धर्मार्थकामसिद्ध्यर्थं स्थिरो भव शुभाय नः ।
सांनिध्यं तु सदा देव स्वार्चायां परिकल्पय ॥
यावच्चन्द्रावनीसूर्यास्तिष्ठन्त्यप्रतिघातिनः ।
तावत्त्वयाऽत्र देवेश स्थेयं भक्तानुकम्पया ॥
भगवन् देवदेवेश त्वं पिता सर्वदेहिनाम् ।
येन रूपेण भगवंस्त्वया व्याप्तं चराचरम् ॥
तेन रूपेण देवेश स्वार्चायां सन्निधो भव ।

इति नमेत् । एतदन्तं सर्वदेवानां समानम् । देवमन्त्रश्च मूलमन्त्रो वैदिको वा ग्राह्यः ।

अथाचार्यः कर्ता वा लिङ्गमर्चां वा ॐ भूः पुरुषमावाहयामि, ॐ भुवः पुरुषमावाहयामि, ॐ सुवः पुरुषमावाहयामि, ॐ भूर्भुवःसुवः पुरुषमावाहयामीत्यावाह्य प्रणवेनासनं दत्त्वा तेनैव दूर्वाश्यामाकविष्णुक्रान्तापद्ममिश्रं पाद्यम्, 'इमा आपः शिवतमाः (१)पूताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः पाद्यास्ता जुषतां प्रतिगृह्यतां प्रतिगृह्णातु भगवान् महाविष्णुर्विष्णवे नमः' इति पाद्यम्, 'भगवान् महादेवो रुद्राय नमः'

(१) 'पूताः' नास्ति क० ।

इति लिङ्गे, (१)एवं देवतान्तरेषूह्यम् । 'इमा आपः आचमनीयास्ता जुषताम्' (२)इति एलालवङ्गकङ्कोलकर्पूरमिश्रमाचमनीयम्, आपः क्षीरकुशाग्रैश्चाक्षतैर्यवतण्डुलैः यवैः सिद्धार्थकैश्चैव अर्घ्यं इत्यर्घ्यम् । ततो वेदमन्त्रैः संस्नाप्य 'इदं विष्णुः' इति विष्णौ 'नमो अस्तु नीलग्रीवाय' इति लिङ्गे प्रतिसरं विन्यस्य (३)वस्त्रं यज्ञोपवीतं च दत्त्वा—

इमे गन्धाः शुभा दिव्याः सर्वगन्धैरलंकृताः ।
पूता ब्रह्मपवित्रेण पूताः सूर्यस्य रश्मिभिः ॥

इति गन्धम्,

'इमे माल्याः शुभा दिव्याः सर्वमाल्यैरलंकृताः ।
पूता०'इत्यादिमाल्यम्, 'इमे पुष्पाः शुभा०'इत्यादि पुष्पम्,

वनस्पतिरसोद्भूतो (४)गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः(५) सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥

प्रतिगृह्णात्वित्यादि धूपम्,

ज्योतिः शुक्रं च तेजश्च देवानां सततं प्रियः ।
(६)प्रज्योतिः सर्वभूतानां दीपोयं प्रतिगृह्यताम् ॥

इति दीपं दत्त्वा विष्णौ संकर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्दनोपेन्द्रहरिश्रीकृष्णेतिद्वादशनामभिः केशवादिद्वादशनामभिर्वा पुष्पाणि समर्प्य तैरेव तर्पणं कृत्वा (७)पायसगुडौदनंचित्रौद-

(१) 'एवं देवतान्तरेषूह्यम्' नास्ति क० ख० ।
(२) 'इत्याचमनीयम्, अर्घ्यं' ग० ।
(३) 'वस्त्रं यज्ञोपवीतं च दत्त्वा' नास्ति ख० ।
(४) 'गन्धाढ्यो धूप उत्तमः' ग० ख० ।
(५) 'आघ्राणः' क० ।
(६) 'प्रभाकरः' क० ।
(७) 'पायसघृतप्लुतपूर्णशरावगुडौदनहरिद्रौदनचित्रौदनानि क०' ।

नानि 'पवित्रं ते विततम्' इति (१)निवेद्य संकर्षणादिपूर्वोक्तनामभिर्द्वादश कृसराहुतीर्हुत्वा तेनैव शार्ङ्गिणे० श्रियै० सरस्वत्यै० विष्णवे० इति हुत्वा 'विष्णोर्नुकं वीर्याणि' 'तदस्य प्रियमभिपाथो' 'प्रतद्विष्णुस्तवते वर्ष्येण' 'परोमात्रया तन्वा वृधानः' 'विचक्रमे पृथिवीमेष एतां' 'त्रिर्देवः पृथिवीमेष एताम्' (२)इति जुहुयात्। पुनः द्वादशनामभिर्जुहुयात्।

लिङ्गे तु दीपान्तं कृत्वा भवाय देवाय० शर्वाय० ईशानाय० पशुपतये० रुद्राय० उग्राय० भीमाय० महते देवाय नमः इति पुष्पाणि दत्त्वा तैरेव तर्पणं कृत्वा 'पवित्रं ते' इति पायसं गुडौदनं च निवेद्य पूर्वोक्तनामभिः कृसरं हुत्वा 'भवस्य देवस्य पत्न्यै स्वाहा' इत्याद्यष्टाभिर्गुडौदनं हुत्वा 'भवस्य देवस्य सुताय स्वाहा' इत्याद्यैर्हरिद्रौदनं हुत्वा 'त्र्यम्बकं यजामहे०' 'मानोमहान्तमुत मानो०' 'मानस्तोके तनये०' 'आरात्ते गोघ्नमुत पूरुषघ्ने०' 'विकिरिदविलोहित०' 'सहस्राणि सहस्रशो' इति (३)द्वादश, एतैर्हुत्वा 'शिवाय शंकराय सहमानाय शितिकण्ठाय कपर्दिने ताम्राय अरुणाय अपगुरमाणाय हिरण्यबाहवे सस्पिंजराय बभ्लुशाय हिरण्याय' इति च जुहुयात्। ततः स्विष्टकृदादिहोमशेषं समाप्य पूर्वोक्तसर्वहविर्भिर्विष्णवे लिङ्गाय वा बलिं द-

---

(१) 'निवेद्य कृसरमाज्यमिश्रं जुहुयात्-वासुदेवाय स्वाहा, संकर्षणाय स्वाहा, प्रद्युम्नाय स्वाहा, अनिरुद्धाय०शान्त्यै० श्रियै० सरस्वत्यै० पुष्ट्यै० विष्णवे०' क०।

(२) 'इति द्वादशनामभिश्चामुष्मै स्वाहेति जुहुयात्' क० ख०।

(३) सहस्राणीत्यनुवाकस्य दशर्चत्वेनात्र दशाभिरित्येवापेक्षितमिति भाति। अत्र द्वादशपदं सर्वत्र दृश्यते। तत्र सदसत्सद्भिर्विचारणीयम्।

यात् । मन्त्रस्तु—

त्वामेकमाद्यं पुरुषं पुरातनं
नारायणं विश्वसृजं यजामहे ।
त्वमेव यज्ञो विहितो विधेय-
स्त्वमात्मनात्मन् प्रतिगृह्णीष्व हव्यम् ॥ इति ।

लिङ्गे तु नारायणपदे रुद्रं शिवमिति वदेत् । ततोऽश्वत्थपर्णे 'भूर्भुवःस्वरोम्' इति हुतशेषं निधा(१)य प्रदक्षिणीकृत्य विश्वभुजे आत्मने परमात्मने नमः इति न(२)त्वा आचार्याय शतं तदर्धं तदर्धं द्वादश तिस्र एकां वा गां दत्त्वा ऋत्विग्भ्योऽपि दक्षिणां दत्त्वा शतं द्वादश वा ब्राह्मणान् भोजयेदिति संक्षेपः । प्रासादमात्रे नूतने तु मात्स्योक्तजलाशयप्रतिष्ठाविधिमेव कुर्यात् । गोरुत्तारणपात्रीप्रक्षेपादि तु न भवति द्वारलोपात् । वारुणहोमस्थाने वास्तुहोमः । अन्यत्तद्वदेव ।

इति भट्टकमलाकरकृतौ लिङ्गार्चाप्रतिष्ठाविधिः ॥

अथ पुनःप्रतिष्ठा । तामधिकृत्य हयशीर्षपञ्चरात्रे—

चाण्डालमद्यसंस्पर्शदूषिता वह्निनाऽथवा ।
अपुण्यजनसंस्पृष्टा विप्रक्षत्रजदूषिता ॥

संस्कार्येति शेषः । पदार्थादर्शे ब्राह्मे—

खण्डिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते ।
यागहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥
अन्यमन्त्रार्चिते चैव पतितस्पर्शदूषिते ।
दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ॥

यागः पूजा । पशुर्गर्दभादिः । पञ्चरात्रे—

खण्डिता स्फुटिता दग्धा यस्मादर्चा भयावहा ।
तस्मात्समुद्धरेत्तां तु पूर्वोक्तविधिना नरः ॥

(१) 'निधायाग्निना सह प्रद' क० ।
(२) 'नत्वाऽङ्गुलीयकुण्डलद्वयवस्त्रयुग्मेनाचार्यं पूजयित्वाऽऽचार्यं' क० ।

*अर्चाभङ्गादावुपवासः कार्यः,
न राज्ञो विप्लवेऽश्नीयात्सुरार्चाविप्लवे तथा ।
इति विष्णुधर्मोक्तेः । सिद्धान्तशेखरे—
चौरचण्डालपतितश्वोदक्यास्पर्शने सति ।
श(१)वाद्युपहतौ चैव प्रतिष्ठां पुनराचरेत् ॥
पञ्चरात्रे—
अङ्गादङ्गादिसंधाने प्रतिष्ठां पुनराचरेत् ।
जला(२)धिवासरहितां नेत्रोन्मीलनवर्जिताम् ॥
शुद्धिविवेके विष्णुः-'द्रव्यवत्कृतशौचानां देवतार्चानां भूयः प्रतिष्ठापनेन शुद्धिः' इति । अर्चाः प्रतिमाः तद्द्रव्यस्य ताम्रादेरुक्तशौचं कृत्वा पुनःप्रतिष्ठां कुर्यादित्यर्थः । स्मृत्यर्थसारेऽप्येवम् ।

तद्विधिर्बौधायनसूत्रे-'पूर्वप्रतिष्ठितस्याशुद्धिपूर्वमेकरात्रं द्विरात्रमेकमासं द्विमासं वाऽर्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने पूर्वोक्ते काले पुण्याहं वाचयित्वा युग्मान्ब्राह्मणान्भोजयित्वा निशायां जलाधिवासं कृत्वा श्वोभूते कलशपूर्णेन पञ्चगव्येन तत्तन्मन्त्रैः स्नापयित्वाऽन्यं कलशं शुद्धोदकेनापूर्य तस्मिन्नवरत्नानि प्रक्षिप्य तं कलशं तत्तद्गायत्र्याष्टसहस्रमष्टशतमष्टाविंशतिवारं वाऽभिमन्त्र्य तेनोदकेन देवं स्नापयेत्ततः शुद्धोदकेन स्नापये-

---

*अर्चाभङ्गादाविति ।
अग्निदग्धे तु दम्भोलिपतने देवमन्दिरे ।
पुनःप्रतिष्ठा कर्त्तव्या आर्त्ते च निस्वनेऽपि वा ॥
संप्रोक्षणविधानेन कुर्यादेवमतन्द्रितः ।
स्थानसंचलने वापि शवस्तूतकिसंस्पृशे ॥

---

(१) 'शवाद्युपहते' ग० ।
(२) 'जलाधिवासविहितनेत्रो' ख० ग० ।

दृष्टसहस्रमष्टशतमष्टाविंशति वा पुरुषसूक्तेन मूलमन्त्रेण च । ततः पुष्पाणि दत्त्वा यथासंभवमर्चयित्वा गुडौदनं निवेदयेत्' इति । बुद्धिपूर्वं तु विच्छेदे पूर्वोक्तां प्रतिष्ठां पुनः कुर्यात् पूर्वोक्तविष्णुवचनात् । इदं मलमासशुक्रास्तादावपि कार्यमिति मदनरत्ने हेमाद्रौ च । देवार्चाप्रासादभेदने तु शूलपाणौ काश्यपः-'वापीकूपारामसेतुसभातडागवप्रदेवतायतनभेदने प्रायश्चित्तं चतस्र आज्याहुतीर्जुहुयात्-'इदं विष्णुः' 'मानस्तोके' 'विष्णोः कर्माणि' 'पादोऽस्य' इति, यां देवतामुत्सादयति तस्यै देवतायै ब्राह्मणान्भोजयेत्' इति । शङ्खलिखितौ-'प्रतिमारामकूपसंक्रमध्वजसेतुनिपातभङ्गेषु तत्समुत्थानं प्रतिसंस्कारोऽष्टशतं च निपातितानाम्' इति । समुत्थानं प्रतिक्रिया । प्रतिसंस्कारः पुनः प्रतिष्ठा । अष्टशतं पणा दण्डश्चेत्यर्थः ।

अथ जीर्णोद्धारः । सच लिङ्गादौ दग्धे भग्ने चलिते वा कार्यः । अयं चानादिसिद्धप्रतिष्ठितलिङ्गादौ भङ्गादिदुष्टेऽपि न कार्यः, तत्र तु महाभिषेकं कुर्यादिति त्रिविक्रमः । कर्ताऽमुकदेवस्य जीर्णोद्धारं करिष्ये(१)इत्यु-

---

चण्डालपुल्कसोदक्यापतिताद्यभिमर्शने ।
विण्मूत्रस्पर्शने वापि खरोष्ट्राभिप्रवेशने ॥
सन्तताचनलोपेऽपि अङ्गारस्पर्शनेऽपि वा ।
एवमाद्येषु जातेषु तदा संप्रोक्षयेद् गुरुः ॥
संप्रोक्षणविधाने तु न कालनियमस्तथा ।
पुण्याहं वाचयित्वा च ब्राह्मणैरुपचारयेत् ॥

इत्याद्यन्यत्र विस्तरः ।

---

(१) 'करिष्ये इति संकल्प्य पुण्याहं' क०।

कृत्वा पुण्याहं वाचयित्वा ना(१)न्दीश्राद्धान्तं कृत्वा आचार्यमृत्विजश्च वृत्वा पीठे(२)मण्डलदेवता आवाह्य लिङ्गे ॐ व्यापकेश्वर हृदयाय नमः, ॐ व्यापकेश्वर शिरसे स्वाहा, इत्येवं षडङ्गं कृत्वा देवतान्तरे मूलमन्त्रेण षडङ्गं कृत्वा(३)अर्चयेत्। अघोरमन्त्रम् अष्टोत्तरशतं जप्त्वाऽग्निं प्रतिष्ठाप्याघोरेण घृतसर्षपैः सहस्रं हुत्वा इन्द्रादिभ्यो नाम्ना बलिं दत्त्वा जीर्णदेवं प्रणवेन संपूज्य सा(४)ज्यतिलैर्ब्रह्मादिमण्डलदेवतानां होमं पूर्वोक्तं कृत्वा देवं प्रार्थयेत्—

जीर्णभग्नमि(५)दं देव सर्वदोषावहं नृणाम्।
अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन्कथिता त्वया॥
जीर्णोद्धारविधानं च नृपराष्ट्रहितावहम्।
तदधस्तिष्ठतां देव प्रहरामि तवाज्ञया॥ इति।

ततः क्षीराज्यमधुदूर्वाभिः समिद्भिश्चाष्टोत्तरसहस्रम् अष्टोत्तरशतं वा देवमन्त्रेण हुत्वाऽङ्गानां दशांशेन लिङ्गचालनार्थं सहस्रं शतं वा पायसेन हुत्वा लिङ्गं प्रार्थयेत्—

'लिङ्गरूपं समागत्य येनेदं समधिष्ठितम्।
यायास्त्वं संमितं स्थानं संत्यज्यैव शिवाज्ञया॥
अत्र स्थाने च या विद्या सर्वविद्येश्वरैर्युता।
शिवेन सह संतिष्ठ'

इति मन्त्रितजलेनाभिषिच्य विसर्जयेत्। ततोऽस्त्रमन्त्रितेन खनित्रेण खात्वा लिङ्गमादाय नद्यादौ वामदेवेन लिङ्गं, प्रणवेन मूर्तिं क्षिपेत्। दारुजं तु मधुनाऽभ्यज्या-

---

(१) 'नान्दीश्राद्धान्तं कृत्वा' नास्ति क०।
(२) 'पीठे मण्डलदेवता आवाह्य' नास्ति क०।
(३) 'अर्चयेत्। अघोरमन्त्रमष्टोत्तरशतं जप्त्वा' नास्ति ख०।
(४) 'साज्यातिलैः' नास्ति ख०। (५) 'मिदं चैव' ख०।

घोरेण दहेत् । हेमरत्नादिमयं तु दग्धं चलितं वा पुनस्तत्रैव स्थापयेत् । ततः शान्त्यै अघोरेण तिलैः सहस्रं हुत्वा प्रार्थयेत्—

भगवन्भूतभव्येश लोकनाथ जगत्पते ।
जीर्णलिङ्गसमुद्धारः कृतस्तवाज्ञया मया ॥
अग्निना दारुजं दग्धं च्छिन्नं शैलादिकं जले ।
प्रायश्चित्ताय देवेश अघोरास्त्रेण तर्पितम् ॥
ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि ।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर ॥

ततो यजमानः प्रार्थयेत्—

गोविप्रशिल्पिभूतानामाचार्यस्य च यज्वनः ।
शान्तिर्भवतु देवेश अच्छिद्रं जायतामिदम् ॥

मूर्तौ तु विशेषः—

त्वत्प्रसादेन निर्विघ्नं देहं निर्मापयत्यसौ ।
वासं कुरु सुरश्रेष्ठ तावत्त्वं चाल्पके गृहे ॥
वसन्क्लेशं सहित्वेह मूर्तिं वै तव पूर्ववत् ॥
यावत्कारयते भक्तः कुरु तस्य च वाञ्छितम् ॥ इति ।

ततो नवां मूर्तिं लिङ्गं वा कृत्वोक्तविधिना स्थापयेत् । मूलं त्वग्निपुराणे स्पष्टम् ।

इति जीर्णोद्धारः ॥

अथ तुलसीग्रहणम् । देवयाज्ञिककृतं स्मृतिसारे—

वैधृतौ च व्यतीपाते भौमभार्गवभानुषु ।
पर्वद्वये च संक्रान्तौ द्वादश्यां सूतकद्वये ॥
तुलसीं ये विचिन्वन्ति ते च्छिन्दन्ति हरेः शिरः ॥

विष्णुधर्मोत्तरे—

रविवारं विना दूर्वां तुलसीं द्वादशीं विना ।
जीवितस्याविनाशाय प्रविचिन्वीत धर्मवित् ॥

तथा—
संक्रान्तावर्कपक्षान्ते द्वादश्यां निशि सन्ध्ययोः ।
यैश्छिन्नं तुलसीपत्रं तैश्छिन्नं हरिमस्तकम् ॥
पाद्मे—
द्वादश्यां तुलसीपत्रं धात्रीपत्रं च कार्तिके ।
लुनाति स नरो गच्छेन्निरयानतिगर्हितान् ॥
रुद्रयामले—
द्वादश्यां च दिवा स्वापस्तुलस्यवचयस्तथा ।
विष्णोश्चैव दिवा स्नानं वर्जनीयं सदा बुधैः ॥
विष्णुधर्मे—
न च्छिन्द्यात्तुलसीं विप्रो द्वादश्यां वैष्णवः क्वचित् ।
देवार्थे तुलसीच्छेदो होमार्थे समिधां तथा ॥
इन्दुक्षये न दुष्येत गवार्थे तु तृणस्य च ॥
ग्रहणमन्त्रस्तु पाद्मे—
तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये ।
केशवार्थं विचिन्वामि वरदा भव शोभने ॥ इति ।
पारिजाते दक्षः—
समित्पुष्पकुशादीनां द्वितीयः प्रहरो मतः ।
अथ पुष्पादेः पर्युषितत्वम् । भार्गवार्चने भविष्ये—
प्रहरं तिष्ठते जाती करवीरमहर्निशम् ।
तुलस्यां बिल्वपत्रेषु सर्वेषु जलजेषु च ॥
न पर्युषितदोषोऽस्ति मालाकारगृहेऽपि च ॥
बृहन्नारदीये—
वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् ।
न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम् ॥
तत्रैव पाद्मे—
तुलसी पर्युषिता नैव बिल्वं तु त्रिदिनावधि ।
पद्मं पञ्चदिनात्त्याज्यं शेषं पर्युषितं विदुः ॥

स्कान्दे—

पालाशं दिनमेकं तु पङ्कजं च दिनत्रयम् ।
पञ्चाहं बिल्वपत्रं च दशाहं तुलसीदलम् ॥

पदार्थादर्शे बोपदेवस्त्वन्यथाह—

बिल्वापामार्गजातीतुलसिशमिशाकेतकीभृङ्गदूर्वा-
मन्दाम्भोजाहिदर्भामुनितिलत(१)सरब्रह्मकह्लारमल्लयः।
चम्पाश्वारातिकुम्भीदमनमरुबका बिल्वतोऽहानि शस्ता-
स्त्रिंशत्त्र्येकार्यरीशोदधिनिधिवसुभूभूयमा भूय एवम् ॥
३० ३ १६ ११ ४ ९ ८ ११ २

अस्यार्थः—शता शतावरी । मन्दः मन्दारः । अहिर्नागकेशरः । मुनिरगस्त्यः । अश्वारातिः करवीरः । कुम्भी पाटलेति कैदेवनिघण्टुः । अरयः षट् । ईशा एकादश । उदधयश्चत्वारः । निधयो नव । वसवोऽष्टौ । भूः एकः । यमौ द्वौ । बिल्वमारभ्याऽहिपर्यन्तं गणयित्वा दर्भमारभ्य पुनस्त्रिंशदादि गणयेदित्यर्थः । एतद्विनोत्तरं पर्युषितानीत्यर्थः । टोडरानन्दे स्कान्दे दमनमुपक्रम्य—

तस्य माला भगवतः परमप्रीतिकारिणी ।
शुष्का पर्युषिता वापि न दुष्टा भवति क्वचित् ॥

तिथितत्त्वे मात्स्ये—

बिल्वपत्रं च माघ्यं च तमालामलकीदले ।
कह्लारं तुलसी चैव पद्मं च मुनिपुष्पकम् ॥
एतत्पर्युषितं न स्यात्कुशाश्च कलिकास्तथा ॥

स्मृतिसारावल्याम्—

जलजानां च सर्वेषां पत्राणामहतस्य च ।
कुशपुष्पस्य रजतसुवर्णकृतयोरपि ॥
न पर्युषितदोषोऽस्ति तीर्थतोयस्य चैव हि ।
मुकुलैर्नार्चयेद्देवं (२)पङ्कजैर्जलजैर्विना ॥

(१) 'तगर' ख० (२) 'चम्पकैर्ज' क०

अथ शिवनिर्माल्यनिर्णयः । सिद्धान्तशेखरे—

*धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान् ।
विहाय शेषं निर्माल्यं चण्डेशाय निवेदयेत् ॥
अन्यदन्नादि पानीयं ताम्बूलं गन्धपुष्पकम् ।
दद्याच्चण्डाय निर्माल्यं शिवभुक्तं तु सर्वशः ॥
आचार्यशिवचण्डानामाज्ञाभङ्गे तु लक्षकम् ।
धनस्य भक्षणे तेषां पादोनं लक्षमीरितम् ॥
निर्माल्ये भक्षिते लक्षपादतः शुद्धिरीरिता ।
दानं च भक्षणसमं तदर्धं तदुपेक्षणे ॥
अकामाद्भक्षणे यद्वा निर्माल्यस्य जपेत्सुधीः ।
ब्रह्मपञ्चक(१)साहस्रं धर्मेण सहितं ततः ॥
कामतो भक्षणे दीक्षा प्रायश्चित्तं न चान्यतः ।
निर्माल्यलङ्घनेऽघोरं प्रजपेदयुतं ततः ॥
स्पर्शश्च लङ्घनसमो विक्रयो भक्षणेन च ॥

स्मृत्यर्थसारेऽपि-'शैवसौरनिर्माल्ये नैवेद्यभक्षणे चान्द्रम्, अभ्यासे द्विगुणम्, मत्याभ्यासे (२)प्रतपनम्, अन्यनिर्माल्येऽप्यनापद्येवम्' इति । इदं च ज्योतिर्लि-

---

*धरेति ।

निर्माल्यं यो हि भक्त्या च शिरसा धारयिष्यति ।
अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः ॥
नरके पच्यते घोरे तिर्यग्योनौ च संभवेत् ॥

इतिनिर्माल्यधारणनिषेधात् । यत्तु—

ब्रह्महाऽपि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् ।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥

इति स्कान्दं, तत्तु अशुचिना न ग्राह्यं, किन्तु स्नानादिना शुचिनेति स्मार्त्ताः । अपनीतं तन्न ग्राह्यमिति श्रीदत्तः । शिवदी-

---

(१) 'साहस्रमर्धेन सहितं' क० (२) 'पतनम्' क० ख०

ङ्गाद्यतिरिक्तविषयम्। तथाच पुरुषार्थप्रबोधे भविष्ये—

ज्योतिर्लिङ्गं विना लिङ्गं यः पूजयति सत्तमः।
तस्य नैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकम्॥
शालग्रामोद्भवे लिङ्गे*बाणलिङ्गे स्वयंभुवि।
रसलिङ्गे तथार्षे च (१)सुरसिद्धप्रतिष्ठिते॥
हृदये चन्द्रकान्ते च स्वर्णरौप्यादिनिर्मिते॥
शिवदीक्षावता भक्तेनेदं भक्ष्यमितीर्यते॥

तथा—

बाणलिङ्गे स्वयंभूते चन्द्रकान्ते हृदि स्थिते।
चान्द्रायणसमं ज्ञेयं शंभोर्नैवेद्यभक्षणम्॥
लिङ्गे स्वयंभुवे बाणे रत्नजे रसनिर्मिते।
सिद्धप्रतिष्ठिते चैव न चण्डाधिकृतिर्भवेत्॥
यत्र चण्डाधिकारोऽस्ति तद्भोक्तव्यं न मानवैः।
चण्डाधिकारो नो यत्र भोक्तव्यं तत्र भक्तितः॥

त्रैविक्रम्याम्—

बाणलिङ्गे च लौहे च सिद्धलिङ्गे स्वयंभुवि।
प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत्॥

क्षाहीनैर्न ग्राह्यमित्येके। ज्योतिर्लिङ्गाद्यतिरिक्तस्य न ग्राह्यमिति शिष्टाः। *बाणलिङ्गे इति। बाणलिङ्गलक्षणं यथा—

पङ्कजम्बूफलाकारं कुक्कुटाण्डसमाकृतिम्।
भुक्तिमुक्तिप्रदं चैव बाणलिङ्गमुदाहृतम्॥
सदा सन्निहितस्तत्र शिवः सर्वार्थसाधकः।
कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येनासुरेण च॥
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद् ध्रुवम्।
एकपार्श्वक्षते धेनुपुत्रदारधनक्षयः॥

---

(१) 'सुप्रसिद्ध' ख०

अत्र—

ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् ।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥

इति स्कान्दादशुचिना न ग्राह्यं शिवनिर्माल्यं, किन्तु स्नात्वेति स्मार्ताः । अनुपनीतेन न ग्राह्यमिति श्रीदत्तः । शिवदीक्षाहीनैर्न ग्राह्यमिति शैवाः । तिथितत्त्वे हेमाद्रौ परिशिष्टे—

*अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पर्शात्सर्वं याति पवित्रताम् ॥

शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च ।
अर्च्यं स्यात्कापिलं लिङ्गं मुनीनां मोक्षकाङ्क्षिणाम् ॥
तीक्ष्णाग्रं वक्रशीर्षं च ह्यस्वं लिङ्गं च वर्जयेत् ।
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ॥

*अग्राह्यमिति । स्वयं नोपभुञ्ज्यादित्यर्थः,

दत्त्वा नैवेद्यवस्त्रादि नाददीत कदाचन ।
त्यक्तं यच्छिवमुद्दिश्य तद्दानेन न तत्फलम् ॥

इति भविष्याच्च ।

अथ व्रतोपयुक्तकृच्छ्रादीनि । तत्र प्राजापत्यमाह याज्ञवल्क्यः—

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैवायं पादकृच्छ्रः प्रकीर्त्तितः ॥
यथाकथञ्चित्त्रिगुणः प्राजापत्योऽयमुच्यते ॥

दिवैव मध्याह्नकाले सकृद्भोजनम् एकभक्तं, सूर्यास्तमयानन्तरमेव सकृद्भोजनं नक्तं, दिवा रात्रौ वा भृत्यादिभ्योऽप्ययाचितस्य भोजनमयाचितम् । दिवैवेति केचित् । अहोरात्रमभोजनमुपवासः । अयं पादकृच्छ्रः । अत्र ग्राससंख्यायां पराशरः—

सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरायाच्याः परं निरशनं स्मृतम् ॥

अथवा आपस्तम्बः—

सायं द्वाविंशतिर्ग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः ॥
कुक्कुटाण्डप्रमाणो वा यथा वाऽऽस्यं विशेत्सुखम् ।

शक्त्या विकल्पः । आपस्तम्बस्तु व्यवस्थया पादकृच्छ्रमाह—

त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् ।
सायं त्र्यहं तथा पादः प्रातः पादस्तथा त्र्यहम् ॥
प्रातः पादं चरेच्छूद्रः, सायं वैश्यस्य दापयेत् ।
अयाचितं तु राजन्ये, त्रिरात्रं ब्राह्मणे स्मृतम् ॥ इति ।

प्रातःपाद एकभक्तत्रयं, सायंपादो नक्तत्रयम् , अयाचितमयाचितत्रयं, त्रिरात्रमुपवासत्रयम् । अयाचितत्रयानन्तरमुपवासत्रयमर्द्धकृच्छ्रः । नक्तत्रयं विना पादत्रयं पादोनकृच्छ्रः,

सायंप्रातर्विनाऽर्द्धं स्यात् पादोनं नक्तवर्जितम् ।

इति आपस्तम्बोक्तेः । अथवा

सायं प्रातस्तथैकं च दिनद्वयमयाचितम् ।
दिनद्वयं च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीयते ॥

इत्यापस्तम्बेनैवोक्तोऽर्द्धकृच्छ्रः

प्रकृतमनुसरामः । अयं पादवृ
जापत्यः । यथाकथञ्चिदित्युक्तेः
स्थानवृद्ध्या एकः । स च—

त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन् द्विजः ॥

इति मनूक्तेः । तेषां प्रातिलोम्येन स्वस्थानवृद्ध्या द्वितीयः, स च "प्रातिलोम्यं चरेयुः" इति वसिष्ठोक्तेः,

उपवासत्रयं कृत्वा कुर्याच्चायाचितत्रयम् ।
नक्तत्रयादे(१)कभक्तत्रयं स्यात्प्रातिलोम्यकम् ॥

(१) 'देकभक्तवतं' घ० ङ० ।

इति वचनात् । दण्डकलितवदादृत्या तृतीयः । स च—

त्र्यहं प्रातरहर्नक्तमहरेकमयाचितम् ।
अहः पराकं तत्रैकमेवं चतुरहौ परौ ॥

इति वसिष्ठोक्तः । पराक उपवासः । अयमेव शिशुकृच्छ्रः,

अनुग्रहार्थं विप्राणां मनुधर्ममृतां वरः ।
बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुदाहरत् ॥

इति तेनैवोक्तेः । प्रोक्तपक्षत्रयेऽन्यतमपक्षं ज(१)पहोमवर्जं कुर्यादिति चतुर्थः,

तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम् ।
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम् ॥

इत्यङ्गिरोवचनात् ।

अशक्तौ एकां धेनुं दद्यात् । तदभावे निष्कं दद्यात्,

गवामभावे निष्कं स्यात्तदर्द्धं पादमेव वा ।

इत्युक्तेः । देशकालोचितं गोमूल्यं दद्यात्,

प्राजापत्यक्रियाऽशक्तौ धेनुं दद्याद्द्विजोत्तमः ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥

इत्युक्तेः । यद्यपि "धेनुः स्यान्नवसूतिका" (अ०को० २-९-७१) इत्युक्तं, तथापि धेनुदानाशक्तौ गोमात्रं दद्यात् बहुस्मृतिषु गोपदस्याप्युपादानात् । विप्रभोजनं वा कार्यम् । तत्संख्यानियमो महार्णवे चतुर्विंशतिमते—

कृच्छ्रे पञ्चातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये
चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिः स्यात्पराके ।
कृच्छ्रे सन्तापनाख्ये भवति षडधिका विंशतिः, सैव हीना
द्वाभ्यां चान्द्रायणे स्यात्तपसि कृशबलो भोजयेद्विंशमुख्यान् ॥

इति । अस्यार्थः-अहरह इत्यस्य प्रत्येकं सम्बन्धात् कृच्छ्रे अहरहः पञ्च ब्राह्मणान् भोजयेत् । ते(२) च षष्टिर्भवन्ति । अतिकृच्छ्रे

(१) 'तपहोम' घ० ङ० । (२) 'तेन' घ० ङ० ।

प्रत्यहं पञ्चदश, द्वादशदिने मिलित्वा ह्य(१)शीतिशतं विप्रा भवन्ति । कृच्छ्रातिकृच्छ्रे प्रत्यहं त्रिंशत्, मिलित्वा षष्ट्युत्तरं त्रिशतम् । असमृद्ध(२)धान्ये तु त्रिगुणिता द्वादशेति मिलिताः षट्त्रिंशत् । तप्तकृच्छ्रे प्रत्यहं चत्वारिंशत् अहसाध्येऽशीतिः, चतुरहसाध्ये षष्ट्यधिकं शतम्, द्वादशाहसाध्ये अशीत्यधिकं शतचतुष्टयम् । पराके प्रत्यहं षष्टिः, विंशत्यधिकं सप्तशतम् । सान्तपने प्रत्यहं षट्त्रिंशतिः । चान्द्रायणे प्रत्यहं चतुर्विंशतिः, तत्र मासो यदि त्रिंशद्दिनः तदा ७२० विंशत्यधिकसप्तशतं विप्रा भवन्ति । अधिकन्यूनादिनके तु सं(३)कलनमूह्यम् । स्वल्पधान्यस्तु कृच्छ्रे द्वादशैव ब्राह्मणान् भोजयेत् "विप्रा द्वादश वा भोज्याः" इति चतुर्विंशतिमतात् । अतिकृच्छ्रमाह मनुः—

एकैकग्रासमश्नीयात् त्र्यहानि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः ॥

त्रीणि त्र्यहानि नव दिनानि पूर्ववत् एकभक्तादिकाले तान्नियमवान् इत्यर्थः । अशक्तौ धेनुत्रयं देयं,

पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा ।

इति चतुर्विंशतिमतात् । तदशक्तौ निष्कगोमूल्यादि प्राग्वत् । एवमग्रेऽपि । अथवा याज्ञवल्क्यः—

अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभोजनः ।

अयमेव पूर्वोक्तप्राजापत्यधर्मक एव । परन्तु एकभक्तादिदिनेषु प्रस्तातिपूरणमात्रमन्नं भुञ्जीत न तु द्वात्रिंशत्यादिग्रासानिति । अत्र येषु दिनेषु भोजनं तेषु पाणिपूरमा(४)त्रमन्नं विधेयम् । एवञ्चोपवासदिने न पाणिपूरान्नभोजनप्राप्तिः । अशक्तौ धेनुद्वयं देयं,

प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतम् ।

इति षट्त्रिंशन्मतात् । एवमग्रेऽपि । अनयोश्चातिकृच्छ्रयोः पापा-

(१) 'साशीति' घ० ङ० । (२) 'धान्यस्य' घ० ङ० ।
(३) 'संख्यासंक' घ० ङ० । (४) 'मात्र' नास्ति घ० ङ० ।

पेक्षः शक्त्यपेक्षो वा विकल्पः(१)। अतिकृच्छ्रपादादिव्यवस्था च प्राजापत्यवत्। कृच्छ्रातिकृच्छ्रमाह गौतमः—अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्र इति। द्वादशरात्रमुदकेनैव वर्त्तनं न त्वन्नेनेत्यर्थः। अशक्तौ तिस्रो धेनवो देयाः, प्राजापत्यत्रयस्थाने कृच्छ्रातिकृच्छ्रविधानात्। तदभावे निष्कत्रयं सार्द्धनिष्कः पादोननिष्को वा देयः। अथवा यमः—

एकैकं पिण्डमश्नीयात्त्र्यहं कल्ये त्र्यहं निशि।
अयाचितं त्र्यहं पिण्डं वायुभक्षस्त्र्यहं परम्॥
अतिकृच्छ्रं चरेदेतत्पवित्रं पापनाशनम्।
चतुर्विंशतिरात्रं तु नियतात्मा जितेन्द्रियः॥
कृच्छ्रातिकृच्छ्रं कुर्वीत एकस्थाने द्विजोत्तमः।

कल्ये प्रातः एकभक्ताकाले इति यावत्। एकस्थाने पूर्वोक्तद्वादशाहसाध्यातिकृ(२)च्छ्रद्वयेनैकः कृच्छ्रातिकृच्छ्र इत्यर्थः। अथवा याज्ञवल्क्यः—

कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्।

यमेन चतुर्विंशत्यहःसाध्ये कृच्छ्रातिकृच्छ्रे भोजनादिनेष्वेकैकग्रासमात्रविधानात् दुग्धभक्षणेऽपि पत्रपुटकादिभिर्ग्रासपरिमाणं कृत्वैव एकग्रासपर्याप्तं दुग्धमश्नीयात्। अशक्तौ तु—"सायं तु (३)द्वादश ग्रासाः" इति ग्राससंख्याया भोजनादिनेषु तावद्दुग्धं पीत्वा प्राजापत्यः कार्यः। तप्तकृच्छ्रमाह याज्ञवल्क्यः—

तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्।
एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः॥

अयं चतुरहसाध्यः। तप्तक्षीरघृताम्बुभिः समस्तैः एकैकादिने वृत्तिः, तत एकोपवास इत्यर्थे तु त्र्यहसाध्यः। अथवा मनुः—

---

(१) 'सान्तपने प्रत्यहं षड्विंशतिः' अधिकं ख०।
(२) 'कृच्छ्रत्रये' घ० ङ०।
(३) 'द्वादशग्रासी' घ० ङ०।

तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् ।
प्रति त्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः ॥

जलादिपरिमाणमाह पराशरः—

अपां पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत् ।
पलमेकं पिबेत्सर्पिः(स्त्रि(१)रात्रं चोष्णमारुतम् ॥

अपां त्रिपलं त्रिरात्रं पिबेदित्यादि प्रतिवाक्यं त्रिरात्रमित्यस्य सम्बन्धः । त्रिरात्रमुष्णोदकस्य बाष्पं पिबेदित्यर्थः । अथ पराशरः—

षट्पलं तु पिबेदम्भः त्रिपलं तु पयः पिबेत् ।
पलमेकं पिबेत्सर्पि)स्तप्तकृच्छ्रं विधीयते ॥

जलादिकं चेहोष्णमेव । अशक्तौ द्व्यहसाध्ये निष्कार्द्धं चतुरहःसाध्ये एका धेनुः,द्वादशाहसाध्ये तिस्रो गावः,

पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा ।

इत्युक्तेः । सान्तपनमाह याज्ञवल्क्यः—

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
प्राश्यापरेऽह्न्युपवसेत्कृच्छ्रं सान्तपनं चरन् ॥

मिलितगोमूत्रादिषट्कमेव पीत्वा परेऽह्न्युपवसेत् । अयं दिनद्वयसाध्यः । अयमेव ब्रह्मकूर्चः । तत्र पराशरोक्तो विधिः कार्यः ।

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
निर्दिष्टं पञ्चगव्यं तु पवित्रं कायशोधनम् ॥
गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥
तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ।
सप्तपत्रास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः ॥
एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि ।
इरावती इदंविष्णुर्मानस्तोके च शंवती ॥

(१) कंसान्तर्गतं नास्ति ख० ।

एताभिश्चैव होतव्यं हुतशेषं पिबेद् द्विजः ।
प्रणवेन समालोड्य प्रणवेनाभिमन्त्र्य च ॥
प्रणवेन समुद्धृत्य पिबेत्तत्प्रणवेन तु ।
यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥
प्राश्नात्पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ।
मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत् ॥
स्वर्णपात्रेण ताम्रेण ब्रह्मतीर्थेन वा पुनः ॥ इति ।

पूर्वेद्युरुपोष्य परेद्युरुक्तरीत्या ब्रह्मकूर्च इति विज्ञानेश्वरः । अथवा जाबालः--

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकैकं प्रसृतं पीत्वा त्वहोरात्रमभोजनम् ॥

इदं सप्ताहसाध्यम् । यतिसान्तपनमाह (शङ्खः(१)—

एतदेव त्र्यहाभ्यस्तं यतिसान्तपनं स्मृतम् ।

एतत् पञ्चगव्यं दिने आहारान्तरं विना पिबेदित्यर्थः । महासान्तपनमाह) याज्ञवल्क्यः—

पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः ।
सप्ताहेन तु कृच्छ्रोयं महासान्तपनः स्मृतः ॥

गोमूत्रगोमयक्षीराणि दधिघृतकुशोदकानि सान्तपनद्रव्याणि एकैकदिने आहारान्तरं विना एकैकं पिबेत्सप्तमदिने उपवासः । अथवा यमः--

त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् ।
त्र्यहं दधि त्र्यहं सर्पिः त्र्यहं क्षीरं ततः शुचिः ॥
महासान्तपनं ह्येतत्सर्वपापप्रणाशनम् ॥

अयं पञ्चदशाहसाध्यः । जाबालः—

षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् ।
त्र्यहं चोपवसेदन्त्यं महासान्तपनं विदुः ॥

(१) कंसान्तर्गतं नास्ति ख० ।

षण्णां पूर्वोक्तगोमूत्रादीनाम् । अयमेकविंशतिरात्रसाध्यः । अशक्तौ सप्ताहसाध्यसान्तपनस्य सार्द्धप्राजापत्यस्थाने विहितत्वादेका धेनुर्निष्कार्द्धं च देयम् ।

पराकतप्तातिकृच्छ्रस्थाने कृच्छ्रत्रयं न्यसेत् ।
सान्तपनस्य चाध्यर्द्धमशक्तौ व्रतमाचरेत् ॥

इति षट्त्रिंशन्मतात् । दिनद्वयसाध्ये सान्तपने निष्कार्द्धं, दिनत्रयसाध्ये यतिसांतपने तु एकां धेनुं दद्यात् । एकविंशतिदिनसाध्ये महासांतपने तिस्रो धेनवोऽर्धनिष्कं च देयं, पञ्चदशदिनसाध्ये तु धेनुद्वयं निष्कार्द्धं च देयं, सप्ताहसाध्ये तु एका धेनुः निष्कार्द्धश्च देयः षडुपवासतुल्यप्राजापत्ये धेनोरुक्तत्वात् सान्तपनस्य चाध्यर्द्धमित्यस्य सप्ताहसाध्यपरत्वाच्च । पराकमाह याज्ञवल्क्यः—

द्वादशाहोपवासेन पराकः परिकीर्त्तितः ।

अशक्तौ कृच्छ्रत्रयं

पराकतप्तकृच्छ्राणां स्थाने कृच्छ्रत्रयं न्यसेत् ॥

तिस्रो धेनव इति यावत् । यावकव्रतमाह शंखः—

गोपुरीषाद्यवान्नं च मासं नित्यं समाहितः ।
व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये ॥

गोर्भक्षणार्थं यवान्दत्त्वा तदनन्तरं गोमयमध्यनिःसृतैस्तैर्यवैः पक्वैः एकभक्तनक्तानि कुर्वन् मासं नयेत् । गोमूत्रपक्वैस्तु तैर्गोमूत्रयावकं भवति,

आतृप्तेश्चारयित्वा गां गोधूमान् यवमिश्रितान् ।
गोपयोज्यांश्च संगृह्य पचेद्गोमूत्रयावकम् ॥

इति योगियाज्ञवल्क्यात् । अशक्तौ यावकव्रते पञ्च धेनवः षडुपवासात्मकप्राजापत्यषट्स्थानत्वात् । प्रसहं यावकभोजनेऽपि तस्यात्यन्तक्लेशसाधनत्वेनोपवासतुल्यत्वात् । गोमूत्रयावकव्रते तु क्लेशाधिक्यात् षड् धेनवः । मासमेकग्रासमात्रदुग्धेन व-

र्त्तनं पयोव्रतम् । (१)तस्मिन् व्रते येन द्रव्येण शरीरवर्त्तनं तद्व्रतस्य तेन व्यपदेशात् । अत एव मार्कण्डेयः—

पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ।
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु ॥ इति ।

पयोव्रतेऽशक्तस्य पञ्च धेनवः पयःपाने केशाभावेऽपि पयसा एकग्रासमात्रपर्याप्ततयोपवासतुल्यत्वात् । चान्द्रायणमाह याज्ञवल्क्यः—

तिथिवृद्ध्या चरेत् पिण्डान् शुक्ले शिखण्डसंमितान् ।
एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं चरन् ॥
इन्दुक्षये न भुञ्जीत एष चान्द्रायणे विधिः ।

शिखी मयूरः । तिथिवृद्ध्या (२)शुक्ले शुक्लपक्षे तिथिवृद्ध्या प्रतिपदादितिथिक्रमेणैकैकं पिण्डं प्रतिपदि एकं द्वितीयायां द्वाविति क्रमेण पूर्णिमायां पञ्चदश चरेत् भक्षयेत् । तदा कृष्णे एकैकतिथिवृद्ध्या प्रतिपदि चतुर्दश द्वितीयायां त्रयोदशेत्येवं क्रमेण एकैकं चतुर्दशीपर्यन्तं ह्रासयेत् । इन्दुक्षये अमावास्यायां न भुञ्जीत । यतिमध्यं नाम चान्द्रायणम् । अथ पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वा एकैकत्यागेन प्रतिपत्प्रभृति चतुर्दशीपर्यन्तं ग्रासमश्नीयात् । अमावास्यामुपोष्य एकैकवृद्ध्या पूर्णिमायां पञ्चदशग्रासान् भक्षयेत् । एतत्पिपीलिकामध्यं नाम चान्द्रायणम् । ह्रासवृद्धिभ्यां चन्द्रस्य अयनं चरणमिव चरणं यत्र कर्मणीति व्युत्पत्तेः । (३)एतच्च चान्द्रमाससाध्यम् । तत्र ह्रासवृद्धी निश्चित्य पिण्डेषु ते कल्पनीये । तत्र चन्द्रोदयकालीना तिथिर्ग्राह्या । तत्र ग्रासा मयूराण्डप्रमाणाः । ग्रासग्रहणकालश्चन्द्रोदयः । वैधत्वाच्च निशीथेऽपि तद्भक्षणम् । चन्द्रोदयानन्तरं प्रायः द्विषष्टिघटीव्यवधाने चन्द्रोदय इति । दिवापि ते परीक्ष्यैव ग्रासानां भक्षणम् । प्राणाग्नेहोत्राधिकारिणामत्रैव तत्करणम् । तथाहि, यदा पञ्च पिण्डा-

(१) 'यस्मिन्' ख० । (२) 'शुक्ले' नास्ति घ० ङ० ।
(३) 'एतच्च चान्द्रायणसाध्यम्' घ० ङ० ।

स्तदा प्राणायेति प्रथमम्, अपानायेति द्वितीयं, व्यानायेति तृतीयम्, उदानायेति चतुर्थं, समानायेति पञ्चमम्। यदा चत्वारस्तदा द्वाभ्यां प्रथमम्। यदा त्रयस्तदा द्वाभ्यां पूर्वौ। यदा द्वौ तदा त्रिभिः प्रथमं द्वाभ्यामुत्तरम्। एकं तु सर्वैः। इतिकर्त्तव्यताविस्तरो महार्णवादौ द्रष्टव्यः। अशक्तावष्टौ गावो देयाः,

अष्टौ चान्द्रायणे देयाः प्रसान्नायविधौ सदा।

इति चतुर्विंशतिमतात्। यवमध्यपिपीलिकामध्यचान्द्रायणयोर्गौतमाद्युक्तप्रकारवतोरष्टौ गावः, स्वल्पप्रकारयुक्तयोस्तयोस्तु त्रयः।

प्राजापत्ये तु गामेकामतिकृच्छ्रद्वयं स्मृतम्।
चान्द्रायणे पराके च तिस्रस्ता दक्षिणास्तथा॥

इति पराशरोक्तेः। समृद्धस्य पञ्च "पञ्च वापि प्रकीर्तिताः" इति पाठान्तरात्। अथवा याज्ञवल्क्यः—

यथाकथञ्चित्पिण्डानां चत्वारिंशच्छतद्वयम्।
मासेनैवोपभुञ्जीत चान्द्रायणमथापरम्॥

प्रत्यहमष्टौ ग्रासान् भक्षयेत्। तत्रापि दिन एवाष्टौ, अथवा नक्तं चतुरो दिने चतुरः, अथवा एकस्मिन्दिने चतुरः अपरस्मिन्द्वादश, अथवा एकरात्रमुपोष्यापरस्मिन षोडश, अथवा दिनद्वयमुपोष्य तृतीयदिने चतुर्विंशतिः, इत्यादि शक्त्या प्रकाराणां मध्ये यथाकथञ्चित् पिण्डान् चत्वारिंशदधिकशतद्वयं भक्षयेत्, 'तिस्रोऽशीतीः समाहितः' इति वचनाच्च। उपक्रमस्तु शुक्लकृष्णान्यतरप्रतिपदोरेव। मासश्च सावनः, अन्यथा चान्द्रमासे ह्रासादिवशेन तथा भक्षणासम्भवाच्च। एवञ्च नैरन्तर्येणानेकैतच्चान्द्रायणानुष्ठाने कदाचिद्द्वितीयचान्द्रायणादि द्वितीयादौ भवति। अयं चापरो विशेषः—पूर्वचान्द्रायणे तिथिनियतग्रासनियमवशात् (१)पूर्वप्रक्रान्तमेकादश्याद्युपवासादि प्रतिनिधिद्वारा कार्यम्, अत्र तु स्वयमेव कार्यं, तिथिनियमेन (२)ग्रासनियमाभावात्। अस्यैव च यतिचान्द्रायणादिसंज्ञा।

(१) 'पूर्वप्रकारान्त' ख०। (२) 'ग्रासनियमा' घ० ङ०।

*पञ्चायतनपूजायां तन्त्रेण च निवेदितमित्यर्थः ।

शिवपुराणे—

ये वीरभद्र(१)शपिताः शिवभक्तिपराङ्मुखाः ।
शंभोरन्यत्र देवेषु ये भक्ता ये न दीक्षिताः ॥
तेषामनर्हमीशस्य तत्प्रसादचतुष्टयम् ।

अष्टावष्टौ समश्नीयात् पिण्डान् मध्यंदिने स्थिते ।
नियतात्मा हविष्यस्य यतिचान्द्रायणं चरन् ॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरन् ॥

इति मनूक्तेः ।

त्रींस्त्रीन् पिण्डान् समश्नीयान्नियतात्मा दृढव्रतः ।
हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतम् ॥

इति यमोक्तमृषिचान्द्रायणम् । यतिचान्द्रायणाद्यशक्तौ तिस्रो गावो देयाः पूर्वोक्तवचनात् ।

अथ मासोपवासव्रतम् । तच्च प्राक् कार्त्तिके प्रपञ्चितम् । तदशक्तौ अष्टौ गावः, तदशक्तौ पञ्च, षडुपवासतुल्यप्राजापत्यप्रत्याम्नायगोपञ्चकेन मासनिर्वाहात् । एवं सोमायनादिप्रत्याम्नायाः स्वयमूह्याः । अत्र प्राजापत्यादेरितिकर्त्तव्यताऽन्यतोऽवगन्तव्या । तत्र स्वातन्त्र्येण कुरुक्षेत्रप्रतिग्रहादिपापनिवृत्त्यर्थं क्रियमाणे वपनमावश्यकं न तु व्रतभङ्गनिवृत्त्यर्थं,

दिनत्रयं न भुञ्जीत मुण्डनं शिरसोऽथवा ।

इति विकल्पन्यायात् ।

प्रकृतमनुसरामः । *पञ्चायतनेति । अत एव 'विष्णुशिवसूर्यगणेशदुर्गाभ्यो नमः' इति श्लिष्टमन्त्र एवोक्तः । शिवनामपूजायामिति केचित् ।

---

(१) 'शमिताः' ख०

काशीखण्डे—

जलस्य धारणं मूर्ध्नि विश्वेशस्नानजन्मनः ।
एष जालन्धरो बन्धः सम(१)स्तसुरवल्लभः ॥

तथा—

स्नापयित्वा विधानेन यो लिङ्गस्नपनोदकम् ।
त्रिः पिबेत्त्रिविधं पापं तस्येहाशु विनश्यति ॥
लिङ्गस्नपनवार्भिर्यः कुर्यान्मूर्ध्न्यभिषेचनम् ।
गङ्गास्नानफलं तस्य जायतेऽत्र विपाप्मनः ॥

इदं पूर्ववाक्यवशाद्विश्वेश्वरविषयमिति केचित् । काशीस्थपुराणप्रसिद्धसर्वलिङ्गविषयं, काशीखण्डे रत्नेश्वराख्याने तथैव दर्शनादित्यन्ये ।

अथ कृषिः । राजमार्तण्डः—

ऋक्षेषूत्तरपौष्णवैष्णवमघामूलानुराधाश्विनी-
प्राजापत्यकरद्विदैवतगुरुप्रालेयपादेषु च ।
निर्दोषैर्वृषभैर्हलैश्च सुमनोमालाभिरभ्यर्चितै-
र्दत्त्वा क्षेत्रपतेर्बलिं हलधरः क्षेत्रं ततः कर्षयेत् ॥

प्राजेशश्रवणोत्तरादितिमघामार्तण्डतिष्याश्विनी
पौष्णानुष्णमरीचयः शतभिषक् स्वाती विशाखा तथा।
जीवार्केन्दुसितेन्दुनन्दनदिने लग्ने च सौम्योदये
सस्यानां वपने तथैव लवने शस्तास्तथा रोपणे ॥

चण्डेश्वरः—

हस्तचित्रादितिस्वातीरेवत्यां श्रवणत्रये ।
स्थिरलग्ने गुरोर्वारे बीजं धार्यं ज्ञशुक्रयोः ॥
'ॐधनदाय सर्वलोकहिताय देहि मे धान्यं स्वाहा' ।
लेखयित्वा इमं मन्त्रं धान्यागारे निधापयेत् ॥
सस्यवृद्धिं परां कुर्यात्पूजितं प्रतिपूजयेत् ।
दक्षिणादिङ्मुखगमनं गमनमभिनवासु नारीषु ॥

(१) 'सम्यक्सुरस्त्री-' इ०

व्ययमपि सस्यधनानां न बुधा बुधवासरे कुर्युः।
शनिवारे च नो कार्यो धनधान्यव्ययो बुधैः।

अथ वस्त्रम्। श्रीपतिः—

रोहिणीषु करपञ्चकेऽविभे त्र्युत्तरासु च पुनर्वसुद्वये।
रेवतीषु वसुदैवते च भे नव्यवस्त्रपरिधानमिष्यते॥
जीर्णं रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुचे बुधदिने तु भवेद्धनाय।
ज्ञानाय मन्त्रिणि भृगौ प्रियसंगमाय
मन्दे मलाय च नवाम्बरधारणं स्यात्॥
रोहिणीगुरुपुनर्वसूत्तरे
या बिभर्ति नववस्त्रभूषणे।
सा न योषिदवलम्बते पतिं
स्नानमाचरति वारुणेऽपि या॥

अथालंकारवलयादि। दैवज्ञवल्लभः—

नासत्यपूषवसुभिः करपञ्चकेन
मार्तण्डभौमगुरुदानवमन्त्रिवारे।
मुक्तासुवर्णमणिविद्रुमशङ्खदन्त-
रक्ताम्बराणि विधृतानि भवन्ति सिद्ध्यै॥

ज्योतिर्निबन्धे—

हस्तानुराधमृगपुष्यधनिष्ठयुक्त-
चित्रोत्तरासु च पुनर्वसुरोहिणीषु।
लग्ने स्थिरे रविसुतेन्दुजजीववारे
हेमादिधारणविधिः कथितो नराणाम्॥

तत्रैव श्रीपतिः—

पौष्णाश्विनीवसुकरादिषु पञ्चकेषु
कौसुम्भहेममणिविद्रुमकाचशङ्खाः।
नार्या धृताः सुतसुखार्थकरा भवन्ति
ब्राह्मोत्तरादितिगुरुष्वसुखाय भर्तुः॥

तत्रैव—

शङ्खादिवररत्नानि पुष्यादित्युत्तरासु च ।
रोहिण्यां नैव गृह्णीत भर्तुर्जीवितकाङ्क्षिणी ॥

अथ सूचीकर्म—

वासवादितिभत्वाष्ट्रमैत्रचन्द्राश्विनीषु च ।
सूचीकर्म तनुत्राणमेभिर्ऋक्षैः प्रशस्यते ॥

अथ शय्या—

हस्तादितित्रब्रह्मगुरूत्तराणि
पौष्णाश्विमूलेन्दुभचित्रभानि ।
वारेषु जीवेन्दुसितेन्दुजानां
शय्यासनारम्भणमुत्तमं स्यात् ॥

अथ शस्त्रधारणम्—

पुष्ये चादितिचित्रपद्मतनये शक्रोत्तरा रेवती-
स्वातीवाजिविशाखामित्रसहिते भानौ गुरौ भार्गवे ।
कुम्भे कीटगृहे वृषे मृगपतौ चेन्दौ शुभैर्वीक्षिते
सन्नाहः शरखड्गकुन्तछुरिकाधार्या नृपाणां हिताः॥

अथ स्वामिसेवा । चण्डेश्वरः—

रोहिण्युत्तरपौष्णेषु वसुवारुणघोरपि ।
सेवेत स्वामिनं भृत्यः शुभवारोदये तथा ॥

ज्योतिर्निबन्धे—

दासीदासादिभृत्यानां कुर्यात्संग्रहणं बुधे ।
स्थिरलग्ने शुभैर्दृष्टे मन्दवारे विशेषतः ॥

अथ गजाश्वदोलाः । स एव—

पौष्णप्रजेशादितिभद्वयानि
हस्तादिषट्कश्रवणोत्तराणि ।
दोलादिमातङ्गतुरङ्गमाणा-
मारोहणेऽभीष्टफलप्रदानि ॥

---

(१) 'शय्यासमारम्भण' क० ख० । (२) 'बुधैः' ग० ।

अथ नृत्यम्—
हस्तः पुष्यो वासवं रोहिणी च
ज्येष्ठा पौष्णं वारुणं चोत्तराश्च ।
पूर्वाचार्यैः कीर्तितश्चक्रवर्ती
कृत्यारम्भे शोभनोऽयं भवर्गः ॥
अथ राजदर्शनम् । श्रीपतिः—
मृगाश्विपुष्यश्रवणश्विष्ठाहस्तध्रुवत्वाष्ट्रभपूषभानि ।
मैत्रेण युक्तानि नरेश्वराणां विलोकने भानि शुभप्रदानि॥
अथ क्रयविक्रयौ—
भाद्रद्वयत्रिदशमन्त्रिदिवाकरेषु
मूलानिलोत्तरतुरङ्गमरेवतीषु ।
सारङ्गपाणिरजनीकरमैत्रभेषु
लाभः सदैव भवति क्रयविक्रयाभ्याम् ॥
वस्त्रे तु—
चित्रा शतभिषा स्वाती रेवती चाश्विनी शुभा ।
श्रवणश्च तथा प्रोक्ता वस्त्राणां क्रयणे शुभाः ॥
अथ सेतुः—
स्वातीयुक्ते मन्दवारे वृषलग्ने शुभे दिने ।
सेतूनां बन्धनं कार्यं ध्रुवभे चार्कजीवयोः ॥
अथ पशुकृत्यम् । श्रीपतिः—
चित्रोत्तराविष्णवरोहिणीषु
चतुर्दशीदर्शदिनाष्टमीषु ।
स्थानप्रवेशं गमनं विदध्यात्
पुमान् पशूनां न कदाचिदेव ॥
चण्डेश्वरः—
हस्तमूलविशाखासु रेवत्यां श्रवणे तथा ।
मैत्रे च वारुणे श्रेष्ठं पशुक्रयणमुच्यते ॥
पूर्वात्रयामृतमयूखहुताशनेषु
इन्द्राग्निधाजिवसुवारुणशंकरेषु ।

एतेषु गोमहिषदन्तितुरङ्गमादि-
नाना(१)प्रकारपशुजातिगतिः प्रशस्ता ॥

अथ गजदन्तच्छेदः । ज्योतिर्निबन्धे—

त्वाष्ट्रे वैष्णव अश्विन्यामादित्ये वसुदैवते ।
दन्तिनां शुभदं कर्म पुष्ये हस्ते च क(२)र्तनम् ॥

अथ निक्षेपः—

भरणी त्रीणि पूर्वाणि आर्द्राश्लेषा मघा तथा ।
चित्रा ज्येष्ठा विशाखा च मूलं मृगपुनर्वसू ॥
एभिर्दत्तं प्रयुक्तं च यद्यन्निक्षिप्यते धनम् ।
पृष्ठतो धावमानस्य ध(३)निनो नोपपद्यते ॥

अथ ऋणमोक्षः । श्रीधरः—

वागीशमन्ददिवसांशकलग्नयुक्ते
रिक्तासु मन्ददिवसे कुलिकोदये च ।
मैत्रद्वितीयपदमैत्रमुहूर्तयुक्ते
राज्युद्गमे च ऋणमोक्षमुशन्ति सन्तः ॥

अथ राजमुद्रा—

मृदुध्रुवक्षिप्रचरेषु भेषु योगे प्रशस्ते शनिचन्द्रवर्जम् ।
वारे तिथौ पूर्णजयाह्वये च मुद्राप्रतिष्ठा शुभदा हि राज्ञाम् ॥

अथ नौः । चण्डेश्वरः—

पौष्णाश्विनीतुरगवारुणमित्रचित्रा-
शीतोष्णरश्मिवसवोऽनलवन्त्यमृनि ।
वारे च जीवभृगुनन्दनके प्रशस्ते
नौकादिसंघटनवाहनमेषु कुर्यात् ॥

अथ भोगः—

गुरुभरविभानुराधाविधातृपौष्णाश्विरोहिणीषु स्यात् ।
स्वात्युत्तरासु कुर्याच्छयनासनभोगभोगादि ॥

---

(१) 'नानाकुमारपशु' ख० (२) 'कीर्तितं' क०
(३) 'निर्धनो' ख० ग०

अथ श्मश्रुकर्म । श्रीपतिः—

पुष्ये पौष्णे चाश्विनीष्वैन्द्वे च
शाक्रे हस्ताद्ये त्रिके भेष्वदित्याम् ।
क्षौरं कार्यं वैष्णवादित्रये च
मुक्त्वा भौमादित्यपातङ्गिवारान् ॥
न स्नातभुक्तोत्कटभूषिताना-
मभ्यक्तयात्रासमरोत्सुकानाम् ।
क्षौरं विदध्यान्निशि संध्ययोर्वा
जिजीविषूणां नवमे न चाह्नि ॥

त्रिस्थलीसेतौ वृद्धगार्ग्यः—

रव्यारसौरवारेषु रात्रौ पाते व्रताहनि ।
श्राद्धाहःप्रतिपद्रिक्ताभद्राः क्षौरेषु वर्जयेत् ॥

गार्ग्यः—

षष्ठ्यमापूर्णिमापातचतुर्दश्यष्टमी तथा ।
आसु सन्निहितं पापं त्रिषु तैले भगे क्षुरे ॥

राजमार्तण्डः—

देवकार्ये पितुः श्राद्धे रवेरंशपरिक्षये ।
क्षौरकर्म न कुर्वीत जन्ममासे च जन्मभे ॥

बृहस्पतिः—

राजकार्ये नियुक्तानां नराणां भूपजीविनाम् ।
श्मश्रुलोमनखच्छेदे नास्ति कालविशोधनम् ॥

तथा—

*क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम् ।
पित्रादिमृतिदीक्षासु प्रायश्चित्ते च तीर्थके ॥

केचित्तूत्तरार्धमन्यथा पठन्ति ।

---

*क्षौरं नैमित्तिकमिति । अत्र 'निषेधे सत्यपि' इत्युपादानात् प्रायश्चित्ततीर्थयो रात्रावपि क्षौरम् । मृतिनिमित्तं तु दिन एव

मुण्डनस्य निषेधेऽपि कर्तनं तु विधीयते । इति ।

नारदः—

नृपविप्राज्ञया यज्ञे मरणे बन्धमोक्षणे ।
उद्वाहेऽखिलवारर्क्षे तिथिषु क्षौरमिष्टदम् ॥

भारते—

प्राङ्मुखः श्मश्रुकर्माणि कारयीत समाहितः ।
उदङ्मुखोऽथवा भूत्वा तथायुर्विन्दते महत् ॥

अपरार्के—

उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः ।
केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत् ॥
*दक्षिणं कर्णमारभ्य धर्मार्थं पापसंक्षये ।
शिखाद्ये नवसंस्कारे शिखाद्यन्तं शिरो वपेत् ॥

यतीनां तु विशेषो निगमे—

कक्षोपस्थशिखावर्जमृतुसन्धिषु वापयेत् । इति ।

अन्येऽपि विधिप्रतिषेधाः प्रागुक्ताः ।

अथेन्धनसंग्रहः—

ब्रह्मानिलार्कमघमूलत्रिपूर्वरौद्र-
पौष्णानुराधगुरुविष्णुविशाखयुक्ते ।

'श्वस्तनी वपनक्रिया'इत्युक्तेः । *दक्षिणं कर्णमिति । तीर्थश्राद्धे वक्ष्यामः । निषिद्धदिने क्षौरे कृते पुनस्तद्दोषशान्त्यर्थं विहितकाले कार्यमित्याह गर्गः—

निषिद्धेषु च कालेषु क्षौर(१)कार्यं यदा भवेत् ।
तद्दोषशान्तये क्षिप्रं कुर्यात्तच्च शुभे दिने ॥ इति ।
आनर्त्तोऽहिच्छत्रः पाटलिपुत्रोदि(२)तिर्दिनः श्रीशः ।
क्षौरे स्मरणादेषां दोषा नश्यन्ति निःशेषाः ॥ इति ।

---

(१) 'क्षौरकर्म यदा' घ० ङ० ।
(२) 'दिनिर्दितिः श्रीशः' घ० ङ० ।

वारे कुजार्कभृगुनन्दनसोमजानां
अष्टन्धनस्य करणं भवति प्रशस्तम् ।

अथ नवान्नम् । श्रीपतिः—

रेवतीश्रुतिपुनर्वसुहस्तब्राह्मतः पृथगपि द्वितये च ।
त्र्युत्तरेषु गदितं पृथुकानां प्राशनं नवनवान्नविधानम् ॥

अथ नवभोजनपात्रम् । ज्योतिर्निबन्धे—

भोज्यपात्रं सुधासिन्धौ घटयेद्वा समाहरेत् ॥
तत्रान्नप्राशनप्रोक्ते काले भोजनमाचरेत् ॥

अथ नवपर्णफलादिभक्षणम् । चण्डेश्वरः—

मूलाश्विमैत्रकरातिष्यहरीन्द्रभेषु
पौष्णोत्तरैन्दवपुनर्वसुवासवेषु ।
वारेषु भूमितनयार्कजवारवर्जं
ताम्बूलनूतनफलाद्यशनं हिताय ॥

अथ होमे आहुतिपातः । ज्योतिषे—

*तरणिविद्भृगुभास्करिचन्द्रमाः
कुजसुरेज्यविधुंतुदकेतवः ।
रविभतो दिनभं गणयेत्क्रमात
प्रतिखगं त्रितयं त्रितयं न्यसेत् ॥
दिनकरार्कितमःकुजकेतवो
हुतभुजे न शुभास्त्वितरे शुभाः ।

---

*तरणीति । एवं वह्निवासोऽपि बोध्यः ।

सैका तिथिर्वारयुता कृताप्ता
शेषे गुणेभ्रे भुवि व(१)ह्निवासः ।
सौख्याय होमे शशियुग्मशेषे
प्राणार्थनाशो दिवि भूतले च ॥ इति ।

(१) 'वह्निवप्रः' घ० ङ० ।

दहनचक्रमिदं प्रविलोक्यतां
हवनकर्मणि सर्वसमृद्धये ॥

अत्र शान्तिरुक्ता विष्णुधर्मे—

क्रूरग्रहमुखे चैव संजाते हवने शुभे ।
शान्तिं विधाय गां दद्याद्ब्राह्मणाय कुटुम्बिने ॥
आयसीं प्रतिमां कृत्वा निक्षिपेत्तामधोमुखीम् ।
गोमूत्रमधुगन्धाद्यैरर्चितां प्रतिमां ततः ॥
स्वस्थां निधाय संपूज्य तत्र होमो विधीयते ॥

अत्रापवादः क्रि(१)यासारे—

नित्ये नैमित्तिके दुर्गाहोमादौ न विचारयेत् ।

अथ ज्वरादौ फलम् । श्रीपतिः—

स्वात्याश्लेषारौद्रपूर्वासु शाके
रोगोत्पत्तिर्जायते यस्य पुंसः ।
तद्भैषज्यव्यापृतो निष्प्रयत्नः
स्यादुद्यद्भाब्धेर्लङ्घज(२)न्मापि वैद्यः ॥
व्याध्युत्पत्तिर्यस्य पौष्णे स(३)मैत्रे
प्राणत्राणं जायते तस्य कृच्छ्रात् ।
वैश्वे सौम्ये रोगमुक्तिस्तु मासा-
द्विंशत्या स्याद्वासराणां मघासु ॥
पञ्चाशस्ते वासवे सद्विदैवे
मूलाश्विन्योरग्निविष्ण्ये नवाहात् ।
याम्ये त्वाष्ट्रे वैष्णवे वारुणे च
नैरुज्यं स्यान्नूनमेकादशाहात् ॥
आहिर्बुध्न्ये तिष्यसंज्ञे यमाख्ये
प्राजापत्यादित्ययोः सप्तरात्रात् ।
रोगान्मुक्तिर्जायते मानवानां
निःसंदिग्धं जल्पितं गर्गमुख्यैः ॥

(१) 'क्रियासागरे' ख० (२) 'जन्मादिवैद्यः' क० (३) 'समित्रे' क०

ज्योतिषे—

एकाहो निधनं दशाहमनलाद्वाणा वियत्पर्वताः
सप्ताङ्का विलयश्च मासयुगलं मासो मृतिः पक्षकः ।
द्वौ मासावथ विंशतिर्दश निशाः पक्षान्तपक्षा नखा
मासौ पक्षदशान्तपञ्चककुभः पीडादिनान्यद्रिवत् ॥

दैवज्ञः—

उरगवरुणरौद्रा वासवेन्द्रत्रिपूर्वा
यमदहनविशाखाः पापवारेण युक्ताः ।
तिथिषु नवमिषष्ठी द्वादशी वा चतुर्थी
भवति मरणयोगो रोगिणां कालहेतुः ॥

अत्र (१)शान्तिः—कुम्भे हैमीं नक्षत्रदेवताप्रतिमां सम्पूज्य द्वादशदलेषु संकर्षणादिद्वादशमूर्तीर्द्वादशादित्यान् वा सम्पूज्य दूर्वासमित्तिलक्षीराज्यैर्गायत्र्या तद्देवतायै अष्टोत्तरशतं हुत्वा दध्योदनं बलिं दत्त्वाऽऽचार्याय गां प्रतिमां च दत्त्वा विप्रान् भोजयेदिति संक्षेपः। विशेषस्तु व्रतहेमाद्रौ पदार्थादर्शे च ज्ञेयः।

अथ भेषजम्। चण्डेश्वरः—

मूलानुराधमृगतिष्यपुनर्वसौ च
पौष्णाश्विनीश्रवणशुक्रकरत्रये च ।
वारेषु वा(२)क्पतिदिनेषु सितेन्दुशस्ते
भैषज्यभक्षणममीषु हितं नराणाम् ॥

अथारोग्यस्नानम्। श्रीपतिः—

इन्दोर्वारे भार्गवे च ध्रुवेषु
सार्पादित्यस्वातियुक्तेषु भेषु ।
पि(३)त्र्ये चान्ते वापि कुर्यात्कदाचि-

---

(१) 'शान्तिः' नास्ति क०
(२) 'वाक्पतिसितेन्दुदिने प्रशस्तं भैष' क०
(३) 'पैत्र्ये' क०

नैव स्नानं रोगनिर्मुक्तजन्तुः ॥
चरे विलग्ने रविभौमवारे
रिक्ते तिथौ स्याद्बहुले च पक्षे ।
धिष्ण्ये चरे रोगनिपीडितानां
स्नानं नराणां निरुजत्वकारि ॥

अथ दन्तधावनम् । पृथ्वीचन्द्रोदये विष्णुः—

प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च ।
नवम्यां भानुवारे च दन्तकाष्ठं विवर्जयेत् ॥

नारदः—

चतुर्दश्यष्टमीपौर्णमासीसंक्रमणेषु च ।
नन्दासु च नवम्यां च दन्तकाष्ठं विवर्जयेत् ॥
श्राद्धे यज्ञे च नियमे तथा प्रोषितभर्तृका ।
व्यतीपाते च संक्रान्त्यां नन्दाभूताष्टपर्वसु ॥
तैलं क्षौरं रतिं मांसं दन्तकाष्ठं च वर्जयेत् ॥

वसिष्ठः—

शन्यर्कशुक्रवारेषु कुजाहे व्रतवासरे ।
जन्माहे श्राद्धदिवसे दन्तकाष्ठं विवर्जयेत् ॥

हेमाद्रौ स्कान्दे—

अभ्यङ्गे जलधिस्नाने दन्तधावनमैथुने ।
जाते च निधने चैव तत्कालव्यापिनी तिथिः ॥

संवर्तः—

रवौ विवाह आशौचे वर्जयेद्दन्तधावनम् ॥

व्यासः—

*अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।

---

*अलाभे दन्तकाष्ठानामिति ।

तृणपर्णैः सदा कुर्यादमामेकादशीं विना ।

इति वाक्यसारोक्तवचनाद् 'अपां द्वादश'इत्यादि एकाद-

अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥

अथामलकस्नानम् । व्यासः—

श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः ।
सप्तमीं नवमीं चैव पर्वकालं विवर्जयेत् ॥
चन्द्रसूर्योपरागे च स्नानमामलकैस्त्यजेत् ॥

क्रतुः—

षष्ठी च सप्तमी चैव नवमी च त्रयोदशी ।
संक्रान्तौ रविवारे च स्नानमामलकैस्त्यजेत् ॥

यमः—

नवमी दशमी चैव तृतीया च त्रयोदशी ।
प्रतिपद्द्वादशी कृष्णा स्नानं तासु विवर्जयेत् ॥

यच्च—

दर्शे स्नानं न कुर्वीत मातापित्रोः सुजीवतोः ।
पुत्रः कुर्वन्निराचष्टे पित्रोरुन्नतिजीविते ॥

इति कण्वयमाद्यैः स्नानमात्रं निषिद्धं, तद्भोगार्थस्नानपरं न नित्यनैमित्तिकपरमिति हेमाद्रिः ॥

अथ तैलस्नाननिषेधः । कात्यायनः—

पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ ।
तैलेनाभ्यज्यमानस्तु चतुर्भिः परिहीयते ॥

गर्गः—

पञ्चदश्यां चतुर्दश्यामष्टम्यां र(१)विसंक्रमे ।
द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शं विवर्जयेत् ॥
न च कुर्यात्तृतीयायां त्रयोदश्यां तिथौ तथा ।
शाश्वतीं गतिमन्विच्छन् दशम्यामपि पण्डितः ॥

क्षीविषयमिति केचित् । तन्न, "पत्रैर्वा शोधयेन्मुखम्" इति वचनान्तरात् ।

---

(१) 'रविवासरे' क० ।

तत्रैवायुर्वेदे—

षष्ठ्यां दिनक्षयेऽष्टम्यामेकादश्यां च पर्वसु ।
द्वादश्यां च चतुर्दश्यां पञ्चम्यां प्रतिपत्तिथौ ॥
व्रते श्राद्धदिने जन्मत्रितये श्रवणार्द्रयोः ।
ज्येष्ठोत्तराफाल्गुनीषु व्यतीपाते च वैधृतौ ॥
विष्टियोगे च संक्रान्तौ मन्वादिषु युगादिषु ।
नाभ्यङ्गं तत्र बालानां वृद्धानां तु न दोषकृत् ॥ इति ।

व्यवहारतत्त्वे—

संक्रान्तिभद्राव्यतिपातवैधृति-
षष्ठ्यष्टमीपर्वसु नार्कभूसुते ।
स्नाने द्वितीया दशमी च गर्हिताः
ष(१)ष्ठ्याद्यमाद्या रदधावनेऽधमाः ॥

अस्यापवादमाह तत्रैव प्रचेताः—

सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम् ।
अन्यद्द्रव्ययुतं तैलं न दुष्यति कदाचन ॥

आयुर्वेदे—

निषिद्धतिथिवारर्क्षग्रहणेष्वपि रात्रिषु ।
किञ्चिद्गोघृतयुक्तं वा विप्रपादरजोन्वितम् ॥
भानौ दूर्वान्वितं भौमे भृयुक्तं पुष्पयुग्गुरौ ।
सर्वेषां सर्वदा तैलमभ्यङ्गेषु न दुष्यति ॥

मङ्गलेष्वप्यदोषः,

माङ्गल्यं विद्यते स्नानं वृद्धिपर्वोत्सवेषु च ।
स्नेह(२)पात्रसमायुक्तं मध्याह्नात् प्राक्तदिष्यते ॥

इति मदनपारिजाते कात्यायनोक्तेः । हेमाद्रौ बृहन्मनुः—

तैलाभ्यङ्गो नार्कवारे न भौमे
नो संक्रान्तौ वैधृतौ विष्टिषष्ठ्योः ।
पर्वस्वष्टम्यां च नेष्टः स इष्टः
प्रोक्तान्मुक्त्वा वासरे सूर्यसूनोः ॥

(१) 'षष्ठ्यादिमाद्या' क० ख० । (२) 'स्नेहमात्र' ख० ।

तिलस्नाननिषेधस्तु षट्त्रिंशन्मते—

तथा सप्तम्यमावास्यासंक्रान्तिग्रहजन्मसु ।
धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशेत् ॥

अथ गृहारम्भः । ज्योतिर्निबन्धे बादरायणः—

वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके ।
सूत्रारम्भः शिलान्यासः स्तम्भारम्भः प्रशस्यते ॥

नारदः—

सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः ।
मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः ॥

अत्र वृषसिंहवृश्चिकाः वैशाखश्रावणकार्तिकाः सौरा ज्ञेया इति कालादर्शः । तत्रैव कारणतन्त्रे—

स्थिरमासे स्थिरे राशौ स्थिरेऽह्नि नववेश्मनाम् ।
कुर्वीत स्थापनं शङ्कोः स्तम्भस्थापनमेव वा ॥

कार्तिकनिषेधस्तुलापरः,

कुम्भे(१)मासेपि सर्वेषां मन्दिराणामुपक्रमम् ।
महर्षयः प्रशंसन्ति धान्यागारं विहाय च ॥

निषेधो धान्यगृहपरः ।

पाकभोजनशालादौ मार्गशीर्षश्च फाल्गुनः ।
रथ्यागेहमठादौ च सहस्यः शुचिरेव तु ॥

पौषाषाढनिषेधस्तु प्रधानगृहपरः,

न प्रधानगृहारम्भं कुर्यात्पौषे शुचावपि ।

इति तत्रैवोक्तेः । ज्योतिस्तत्त्वे—

पूर्वापरास्यं तु नभोऽन्त्यपौषे
याम्योत्तरास्यं सहसि द्वितीये ।
कार्यं गृहं जीवबुधर्क्षगार्के
नीचास्तगौ जीवसितौ च हित्वा ॥

---

(१) 'माघेऽपि' ख० ।

रत्नमालायाम्—

कर्कनक्रहरिकुम्भगतेऽर्के
पूर्वपश्चिममुखानि गृहाणि ।
तौलिमेषवृषवृश्चिकयाते
दक्षिणोत्तरमुखानि वदन्ति ॥

दैवज्ञवल्लभः—

शोकं(१)धान्यं पश्चतां निःपशुत्वं
स्वापं नैःस्वं संगरं भृत्यनाशम् ।
स्वं श्रीप्राप्तिं वह्निभीतिं च लक्ष्मीं
कुर्युश्चैत्राद्या गृहारम्भकाले ॥

गर्गः—

त्र्युत्तरामृगरोहिण्यां पुष्ये मैत्रे करत्रये ।
धनिष्ठाद्वितये पौष्णे गृहारम्भः प्रशस्यते ॥
रोहिण्यां श्रवणत्रयेऽदितियुगे हस्तत्रये मूलके
रेवत्युत्तरफल्गुनीषुरगभे मैत्रोत्तराषाढयोः ।
शस्तं वास्तु कुजार्कवर्जितदिने गोकुम्भसिंहे सुखे
कन्यायां मिथुने नभःशुचिसहोराधोर्जके फाल्गुने ॥

कालादर्शे सनत्कुमारः—

आदित्यभौमवर्जं तु सर्वे वाराःशुभप्रदाः ।

वास्तुशास्त्रे—

मार्गशीर्षे तथा पौषे वैशाखे श्रावणे तथा ।
फाल्गुने च कृतं वेश्म सर्वसंपत्प्रदं भवेत् ॥
कार्तिके माघमासे च चैत्रे ज्येष्ठे तथाश्विने ।
भाद्रपदे न कुर्यात्सर्वथा गृहम् ॥
द्वितीया च तृतीया च पञ्चमी सप्तमी तथा ।
त्रयोदशी च दशमी पूर्णा चैकादशी तथा ॥
वेश्मारम्भे शुभाय स्युर्विशेषाच्छुक्लपक्षगाः ॥

(१) 'रत्नं धान्यं' इति कालादर्शे पाठः ।

व्यवहारसारे—

शिलान्यासः प्रकर्तव्यो गृहाणां श्रवणे मृगे।
पौष्णे हस्ते च रोहिण्यां पुष्याश्विन्युत्तरात्रये॥

वास्तुप्रदीपे—

अधोमुखैर्भैर्विदधीत खातं शिलास्तथैवोर्ध्वमुखैश्च पट्टम्।
तिर्यङ्मुखैर्द्वारकपाटयानं गृहप्रवेशो मृदुभिर्ध्रुवैश्च॥

लल्लः—

स्नानं च पाकं शयनं च भोज्यं गजालयं वाजिगृहं धनस्य।
देवस्य पूर्वादिदिशि क्रमेण मध्ये सभा भूपनिवेशनाय॥

शिल्पशास्त्रे—

कन्यासिंहे तुलायां भुजगपतिमुखं शम्भुकोणेऽग्निखातं
वायव्ये स्यात्तदास्यं त्वलिधनमकरे ईशखातं वदन्ति।
कुम्भे मीने च मेषे निर्ऋतिदिशि मुखं खातवायव्यकोणे
चाग्नेः कोणे मुखं वै वृषमिथुनगते कर्कटे रक्षखातम्॥

तत्त्वचिन्तामणौ—

यत्र दैर्घ्यं गृहादीनां द्वात्रिंशद्धस्ततोऽधिकम्।
न तत्र चिन्तयेद्धीमान् गुणानायव्ययादिकान्॥

राजमार्तण्डः—

आयव्ययौ मासशुद्धिं तृणागारे न चिन्तयेत्।
शिलान्यासादि नो कुर्यात्तथागारे पुरातने॥

व्यवहारतत्त्वे—

निषिद्धेष्वपि कालेषु स्वानुकूले शुभे दिने।
तृणकाष्ठगृहारम्भे मासदोषो न विद्यते॥

चण्डेश्वरः—

पूर्णादि त्वष्टमीं यावत्पूर्वास्यं वर्जयेद् गृहम्।
उत्तरास्यं न कुर्वीत नवम्यादिचतुर्दशीम्॥
अमावास्याष्टमीं यावत्पश्चिमास्यं विवर्जयेत्।
नवम्यादौ तथा याम्यं यावत्कृष्णचतुर्दशीम्॥

ध्रुवं दृ(१)ष्ट्वाथवा स्मृत्वा कर्तव्यं वास्तुरोपणम् ।
सायाह्नवर्ज्यदिवसे रात्रौ त्यक्त्वा महानिशम् ॥

वराहः—

दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमाम् ।
शेषाः प्रदक्षिणेन स्तम्भाश्चैवं समुत्थाप्याः ॥

कालादर्शे वास्तुशास्त्रे—

खाते चैव शिलान्यासे(२)वृषचक्रं प्रशस्यते ।

तच्चोक्तं शान्तिरत्ने—

चतुर्हस्तप्रमाणं तु खात्वा गर्तं समन्ततः ।
कुम्भोदकैः सेचयेयुः शान्तिपाठपुरःसरम् ॥
तत ईशानदिग्भागे साक्षतं रत्नपञ्चकम् ।
साज्यं कुम्भं स्थिरं मुक्त्वा वास्तुपूजनपूर्वकम् ॥
कुम्भोपरि शिलान्यासः कर्तव्यस्तदनन्तरम् ॥

अथ गृहप्रवेशः । बृहस्पतिः—

नन्दायां दक्षिणद्वारं भद्रायां पश्चिमेन तु ।
जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेत् ॥

वसिष्ठः—

कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं
विप्रान्पूज्यानग्रतः पूर्णकुम्भम् ।
हर्म्ये रम्ये तोरणस्रग्वितानैः
स्त्रीभिः स्रग्वी गीतवाद्यैर्विशेच्च ॥

व्यवहारतत्त्वे—

सौम्यायने श्रावणमार्गपौषे
जन्मर्क्षलग्नोपचयोदयेंऽशे ।

---

(१) 'दृष्ट्वा तथा स्मृत्वा' क० ।

(२) वृषचक्रं धर्माब्धौ—नेष्टानि सप्त सूर्यर्क्षादिष्टान्येकादशाष्टमात् । दश शिष्टानि नेष्टानि चक्रे स्युर्वृषवास्तुनि ॥ यद्वा तुर्यात्पञ्चदशाब्ध्योर्विंशतिसंख्यकात् । वेदाब्धिपञ्च नेष्टानि गृहारंभप्रवेशयोः' इति वास्तुचक्रम् ।

वामं गतेऽर्के गृहवास्तुपूजां
कृत्वा विशेद्वेश्म भकूटशुद्धम् ॥

वास्तुशास्त्रे—

लग्नात्प्रागादितो दिक्षु द्वौ द्वौ राशी नियोजयेत् ।
एकमेकं न्यसेत्कोणे सू(१)र्यं वामं विचिन्तयेत् ॥

वसिष्ठः—

चन्द्रजार्यसितवासरेषु च
श्रीकरं सुतमहार्थलाभदम् ।
सूर्यसूनुदिवसे स्थिरप्रदं
किन्तु चौरभयमत्र निर्दिशेत् ॥

रत्नकोशे—

पुष्ये धनिष्ठामृगवारुणेषु
स्वायंभुवर्क्षे त्रिषु चोत्तरासु ।
अक्षीणचन्द्रे शुभदो नृपस्य
तिथावरिक्ते च गृहप्रवेशः ॥

नारदः—

प्रवेशो मध्यमो ज्ञेयः सौम्यकार्तिकमासयोः ।
माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः ॥
अकपाटमनाच्छन्नमदत्तबलिभोजनम् ।
गृहं न प्रविशेद्धीमान्नापदामाकरो हि त(२)त् ॥

ज्येष्ठः क्षुद्रगृहपरः । वृद्धगार्ग्यः—

भानोश्च भौमस्य विहाय वारौ
शूलादियोगानशुभान्नवापि ।
रिक्ता तिथिश्चापि मृदुध्रुवर्क्षे
सौम्यायने च प्रविशेद्गृहाणि ॥

रत्नमालायाम्—

त्वाष्ट्रमित्रशशिपू(३)षदैवतान्यामनन्ति मुनयो मृदून्यथ ।

(१) 'सूर्यं वामे विचारयेत्' ख० । (२) 'यत्' क० । (३) 'पुष्यदेवता' क० ।

मैत्रगे हरति भूषणाम्बरार्द्रतिमङ्गलविधानमेषु च ॥

रोहिण्युत्तरात्रयं च ध्रुवाणि । प्रवेशश्च वास्तुपूजां कृत्वा कार्यः—

जीर्णोद्धारे तथोद्याने तथा गृहनिवेशने ।
नवप्रासादभवने प्रासादपरिवर्तने ॥
द्वाराभिवर्तने तद्वत्प्रासादेषु गृहेषु च ।
वास्तू(१)पशमनं कुर्यात्पूर्वमेव विचक्षणः ॥

इति मात्स्योक्तेः । तत्रैव—

कृत्वाग्रतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनानि तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयं स्वगृहं विशेच्च ॥
गृह्योक्तहोमविधिना बलिकर्म कुर्यात्
प्रासादवास्तुशमने च विधिर्य उक्तः ।
संतर्पयेद्द्विजवरानथ भक्ष्यभोज्यैः
शुक्लाम्बरः स्वभवनं प्रविशेत्सुरूपम् ॥

अथ कलिवर्ज्यानि बृहन्नारदीये—

*समुद्रयातुः स्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥

यस्तु कार्त्तयुगो धर्मो न कर्त्तव्यः कलौ युगे ।
पापप्रयुक्ताश्च सदा कलौ नार्यो नरास्तथा ॥

इत्यादित्यपुराणवचनेन यद्यपि कृतयुगसंबन्धि धर्मसामान्यं निषिद्धं तथापि सर्वस्य तस्य निषेद्धुमशक्यत्वाद्विशेषानाह—*समुद्रेति । यद्यपि समुद्रयानं न विहितं तथापि बौधायनेन "समुद्रयानं ब्राह्मस्य न्यासापहरणम्" इत्यादिना तत्कर्तुः प्रायश्चित्तं विहितं, तदपि कलौ कर्त्तव्यमेवेति तत्करणानन्तरं तद्व्यवहारो निषिद्ध्यते,

(१) 'वास्तुप्रसवनं' क० ।

देवराच्च सुतोत्पत्तिर्मधुपर्के *पशोर्वधः ।
*मांसदानं तथा*श्राद्धे*वानप्रस्थाश्रमस्तथा ॥
दत्ताच्चतायाः कन्यायाः पुनर्दानं परस्य च ।
*दीर्घकालं ब्रह्मचर्यं*नरमेधाश्वमेधकौ ॥

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः ।

इत्यग्निपवचनाच्च । एतच्च प्रायश्चित्तं रागप्राप्ते समुद्रयान एव । शंखोद्धारादितीर्थे यात्राविधिनान्तरीयकं समुद्रयानमतो दोषाभावान्न प्रायश्चित्तमित्यन्यत्र विस्तरः । अत्र क्रत्वर्थमात्रनिषेधेपि न क्षतिः पुरुषार्थनिषेधान्तरसत्त्वात् । *पशोरिति ।

महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् ।

इति अजादिसंग्रहार्थं पशुपदम् । *मांसदानमिति श्राद्धसम्बन्धि(१)क्रत्वर्थपुरुषार्थत्वं निषिध्यते, यथा वेदिबर्हिर्धर्माणां प्रधानसम्बन्धिमात्रांशे विधिः, न तु तादर्थ्यांशेऽपि, मानाभावात्, तद्वत् ।(२)एतेन—

शौचं च पात्रशुद्धिश्च श्रद्धा च परमा यदि ।
अनन्ततृप्तिकृच्छ्राद्धमेतत्खलु न चामिषम् ।

इति पुरुषार्थमामिषदानं निषिध्यते, न तु क्रत्वर्थे विधिस्पृष्टे निषेधानवकाशादिसपहसितम् । *श्राद्धे इति उपलक्षणार्थं, तेनो-(३)पयाचितकादावपि निषेधः । *वानप्रस्थेति ।

सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम् ॥
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥(या०स्मृ०३-४६)

इति विहितः । वानप्रस्थो बुभूषुरिति शेषः । *दीर्घकालमिति । "अष्टचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यम्" इति श्रुतिविहितम्,

यदि चात्यन्तिको वासो रोचेत स्वगुरोः कुले ।
युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥

---

(१) 'क्रत्वर्थं पुरुषार्थं च' ख० । (२) 'एतेन' नास्ति घ० ङ० ।
(३) 'तेनोपयाचितकारादिनिषेधः' घ० ङ० ।

*महाप्रस्थानगमनं *गोमेधश्च तथा मखः ।
इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः ॥
कमण्डलुः 'सोदकं च*कमण्डलुम्' इत्युक्तः, मृन्म-

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥
एतेष्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽशिशुश्रूषां सादयेद्देहमात्मनः ॥

इति विहितं नैष्ठिकं च । स्थानमङ्गुष्ठाग्रादिना नियतमूर्ध्वावस्थानम् , आसनं नियमोपवेशनं, विहारो भ्रमणम् , एतैस्तपोविशेषो लक्ष्यते । नव्यास्तु दीर्घकालमिति कालापवादमात्रम् । अन्यथा दीर्घं ब्रह्मचर्यमित्येव ब्रूयात् । तेन श्रौतमेव निषिध्यते न नैष्ठिकम् । तेन द्राविडानां नैष्ठिकाचारोऽपि संगच्छते इत्याहुः । *नरमेधेति । "ब्रह्मणे ब्राह्मणमालभते" इति "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति विहितौ । *महाप्रस्थानेति ।

यो जीवितुं न शक्नोति महाव्याध्युपपीडितः ।
सोऽग्न्युदकमहायात्रां कुर्वन् वा न प्रदुष्यति ॥

इति विहितमाशरीरपातमुत्तरदिग्गमनम् । *गोमेधश्चेति । "मैत्रावरुणीं गां वशामनुवन्ध्यामालभेत" इति विहितो यागभेदः । चकारात् राजसूयग्रहः,

न कलौ क्रियते अश्वमेधो वाप्यथ गोसवः ।
नरमेधोऽक्षता नारी देवरात् पुत्रसन्ततिः ॥
गर्हितं सप्तकं ह्येतद्राजसूयः कमण्डलुः ।

इति हेमाद्रौ गारुडाद्धा । राजसूयश्च "राजा राजसूयेन यजेत" इति विहितः । *कमण्डलुमित्युक्त इति । इदमुपलक्षणम् ,

दाक्षायणी ब्रह्मसूत्री वेणुमान् स कमण्डलुः ।

इत्युक्तस्योपलक्षणम् । तथाच स्नातकस्य इत्युक्तः "अथ

यो वा । दत्ता ऊढा,

*ऊढायाः पुनरूढाहं*ज्येष्ठांशं*गोवधं तथा ।
कलौ पञ्च न कुर्वीत *भ्रातृजायां कमण्डलुम् ॥

इति हेमाद्रौ वचनात् । ऊढायाः—

पुरा पुरुषसंयोगान्मृते देयेति केचन ।

इत्या*दिभिर्विवाह्यतोक्ता । हेमाद्रौ ब्राह्मे—

गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा ।
नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिः ॥

गोत्राद्गोत्रजायाः पितृष्वसुः, मातृसपिण्डान्मातुलात्तत्कन्यायाः विवाहः कलौ न कार्यः । *तेन यानि तद्विधायकानि, तानि *युगान्तरविषयाणि । तथा च

कमण्डलुचर्यामुपदिशन्ति" इति बौधायनोक्तेतिकर्त्तव्यताकः काष्ठमयो मृन्मयो वेत्यर्थः । तेन मृन्मयो वेति वाकारः सङ्गच्छते । न च कमण्डलुधारणं वानप्रस्थाश्रमे इति मतं सम्यक्, तस्य पृथगुपादानात् ।

ननु दत्तापदं कुतो न वाग्दत्तापरमित्यत आह-*ऊढाया इति । *ज्येष्ठांशमिति ।

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् । (म० स्मृ.९-११२)

इति विहितम् । *गोवधमिति । मधुपर्के इति शेषः । *भ्रातृजायामिति । जायामिति शेषः । पञ्चेति न परिसंख्या, वाक्यान्तरदर्शनात् । एतद्वाक्योपात्तत्वोपाधिना च पञ्चत्वम् । *आदिभिरिति । आदिना

ऋतावदृष्टे कन्यैव पुनर्देयेति केचन ।

इत्यादिपरिग्रहः । ननु पैतृष्वसेयीमातुलकन्ययोर्विवाहे "तृतां जहुः" इत्यादिश्रुतिः प्रमाणं, श्रुतेः स्मृत्यपेक्षया प्राबल्यादित्यत आह-*तेनेति । *युगान्तरेति । न चैतद्युग एव अर्जुनादीनां कथं मातुलकन्यापरिणय इति वाच्यं "विहितान्यपि कर्माणि"

व्यासः—

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः ॥

इति कलौ तन्निन्दामाह । मातृतस्तृतीयां मातुलकन्यामित्यर्थः । उक्तं चैतत्प्राक् । *मद्यं 'स्त्रीभ्यश्च सुरामाचामम्' इत्यादिना *विहितमपि वर्ज्यम् ।

इति अग्निमत्वाक्यात् । *मद्यमिति । सुरापैष्टीनां चायं निषेधो न विषयीकरोति, सुरामद्ययोर्भेदात् ,

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥

इति मनुना द्विजातिसामान्ये तन्निषेधाच्च । न च माध्वीकादिकं,

माधूकमैक्षवं सैरं तालं खार्जूरपानसम् ।
मधूत्थं चैव माध्वीकं मैरेयं नारिकेरजम् ॥
अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य तु ॥

इति विष्णुना सामान्यत एव तन्निषेधात्, "नित्यं मद्यं ब्राह्मणो वर्जयेत्" इति निषेधान्तराच्च; किन्तु

कामादपि हि राजन्यो वैश्यो वापि कथञ्चन ।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते ॥

इति बृहद्याज्ञवल्क्येन राजन्यवैश्ययोरभ्यनुज्ञातं मद्यं निषिध्यते । एवं त्रैवर्णिकादिपुरस्कारेण वामागमादौ विहितं विनायकशान्त्यादौ च क्षत्रियादेरुक्तं मद्यं निषिध्यते । नन्वेतावता निषेधस्य प्राप्तिपूर्वकत्वोपपत्तौ कथं "स्त्रीभ्यश्च सुरामाचामम्" इति सङ्गच्छते, मद्ये सुरालक्षणायां मानाभावात् ? शृणु, मद्यमपीह सुराशब्देन ग्रहीतुं शक्यते, गौडी-पैष्टी-फालीभेदेन तस्यास्त्रिविधत्वात् । *विहितमिति । आश्वलायनगृह्ये "अपरेद्युरन्वष्टक्यम्" इत्यत्र विहितमित्यर्थः ।

हेमाद्रौ आदित्यपुराणे—

*विधवायाः प्रजोत्पत्तौ देवरस्य नियोजनम् ।

ओदनाग्रद्रवं प्राहुराचामं हि मनीषिणः ।

*विधवाया इति । अत्र—

विहितान्यपि क(१)र्माणि धर्मलोपभयाद् बुधैः ।
समापने निवृत्तानि साध्वभावात्कलौ युगे ॥

इति प्रकृतम् । समापने जन्मेजयाश्वमेधसमाप्तौ निवृत्तानि निवर्त्तितानि । तेन द्रोणादीनां वधे कथं पाण्डवादीनां कलिमध्ये दोषो नास्तीति न शङ्क्यम् । इदं च "देवराच्च सुतोत्पतिः" इति च वाग्दानानन्तरं मृते पत्यौ देवरपरं,

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

अनेन विधानेन घृताभ्यङ्गादिनियमवन्नियोजनविधानेन ।

यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेतामप्रसवात्सकृत्सकृदृतावृतौ ॥

इति मनुना,

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋताविया(२)त् ॥

इति याज्ञवल्क्येन च तदनुज्ञानात्, न तु विवाहानन्तरं विधवायां,

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।

इति मनुना वि(२)वाहानन्तरं विधवानियोजननिषेधात् । नचैवं भारते कथं सत्यवत्यां कनिष्ठभ्रातृभार्यायां विधवायां व्यासो नियुक्त इति वाच्यम् , तत्र 'धनेनोपतोष्य कथन ब्राह्मणो नियोज्यः' इति भीष्मानुज्ञया सत्यवत्याःतथा(३)करणेन निषेधगतान्य-

(१) 'कार्याणि' ख० ।
(२) 'विवाहानन्तरं विधवानियोजन' नास्ति घ० ङ० ।
(३) 'तथा' नास्ति ख० ।

*बालायाः क्षतयोन्यास्तु वरेणान्येन संस्कृतिः ॥

पदस्य ब्राह्मणेतरान्यपरत्वात् । अन्यथा ब्रह्मक्षत्रियदेवक्षत्रियभेदो न स्यात् । महाप्रभावतया दोषकल्पनाविरहेणान्यपदस्य यथाश्रुतार्थत्वाद्वा । देवराच्चकारादनुज्ञातसपिण्डसगोत्रयोरपि ग्रहः । *बालाया इति 'दत्ताक्षतायाः' इत्येतत्समानार्थम् । वस्तुतस्तु ननु इदं वाक्यद्वयं कथं सङ्गच्छते, "नान्यस्मिन् विधवा नारी" इति मनुना सर्वदा तन्निषेधात् ।

मन्वर्थविपरीता तु स्मृतिः सापि विनश्यति ।

इति अङ्गिरोवाक्यात्, नापि देवरनियोजनं तदर्थः "देवराच्च सुतोत्पत्तिः" इत्यनेन पौनरुक्त्यापत्तेः, नापि वाग्दत्ताविषयकं तदानीं क्षतयोनित्वशङ्काया अभावात् ; इति चेत् ? न,

दत्तामपि हरेत्पूर्वाच्छ्रेयाँश्चेद्वर आव्रजेत् ।

इति सप्तपद्युपक्रमणात्प्राग् यदन्यस्मै दानमुक्तं तद्विषयकत्वात् । ननु पराशरेण "कलावनुष्ठेयान्धर्मान् वक्ष्यामि" इति प्रतिज्ञाय

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ॥
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति वचनाद् वाग्दत्तायाः कलौ पत्यन्तरमस्तीति (१)कथं दत्तापहारः कलिवर्ज्य इति चेत् ? (२)कलौ दत्तापहारो न कार्यः, वाग्दानानन्तरतन्मरणे पराशरवचनात्तस्याः वरान्तरेण विवाहः कार्यः,

कन्यायां शुल्कदत्तायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते ॥

इत्युक्तवाक्ये कन्याया अनुमतौ पुरुषान्तराय दानलाभात् । इयांस्तु विशेषः—कन्यानुमतावपि देवराय सा न विवाह्या नियोगसाम्यात्, 'देवराच्च सुतोत्पत्तिः' इति सामान्यतो निषेधात् । एवं

---

(१) 'कथं वाग्दत्ता ख० ।
(२) 'कलौ दत्तापहारो न कार्यः' नास्ति ख० ।

*कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः ।
*आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् ॥

सगोत्रसपिण्डयोरपि न विवाह्येति । *कन्यानामिति ।

तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः ॥

इति याज्ञवल्क्येन विहितः । अत्र-

असवर्णासु कन्यासु विवाहश्च द्विजातिभिः ॥

इति स्मृत्यन्तरं 'द्विजानामसवर्णासु' इति प्रागुक्तं चैकार्थं बोध्यम् । *आततायीति ।

गुरुं वा बालवृद्धं वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥

इति विहितं सन्मुखमकूटशस्त्रेण मारणम् । एतेन "नाततायिवधे दोषोऽन्यत्र गोब्राह्मणेभ्यः" इति सौमन्तवं व्याख्यातं, तस्य कलिपरत्वात् । एवं सति यत् श्रीरामेण रावणं हत्वा दश जारूप्या(?)श्वमेधाः कृता इति रामायणं तत् आततायिवधे युगान्तरे सपरिहारो दोष इत्येतदर्थम् । वस्तुतस्तु "गुरुं वा बालवृद्धं वा ब्राह्मणं वा" इत्यादिवाशब्दस्वारस्यात्कैमुत्यन्यायेन ब्राह्मणभिन्न आततायी वध्य इत्यत्रैव तात्पर्यम् । इदमपि स्ववधोद्यततातायिविषयम् ,

उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम् ।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत् ॥

इति गालववचनात् ।

स्वाध्यायिनां कुले जातं न हन्यादाततायिनम् ।
तं हत्वा भ्रूणहा स स्यादहत्वाऽभ्रूणहा भवेत् ॥

इति बृहस्पतिवचनम्

आततायिनमुत्कृष्टं व्रतस्वाध्यायसंयुतम् ।
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत् ॥

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः ।
*सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥
*महाप्रस्थानगमनं *गोसंज्ञासिश्च गोसवे ।
सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः ॥
*अग्निहोत्रहव(१)न्याश्च लेहो लीढापरिग्रहः ।
वृत्तस्वाध्यायसा(२)पेक्ष्यमघसंकोचनं तथा ॥
*प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ।
संसर्गदोषस्तेयान्यमहापातकनिष्कृतिः ॥

इति च स्ववधानुद्यतातताय्यपरमिति । एवञ्च स्ववधोद्यत-ब्राह्मणभिन्नाततायिवधः कलौ न कार्य इत्याशयेन द्विजानामिति पदम् । *सत्रेति । आसनोपायचोदिते "सप्तदशावराश्चतुर्दश-परमाः सत्रमासीरन्" इति विहिता सत्रदीक्षा, सत्राधिकार इति यावत् । *महाप्रस्थानम् आशरीरपातमुत्तरदिग्गमनम् ।

यो जीवितुं न शक्नोति महाव्याध्युपपीडितः ।
सोऽग्न्युदकमहायात्रां कुर्वन् वा न प्रदुष्यति ॥

इति विहिता महायात्रा । *गोसंज्ञासिरिति । गोसवनि-षेधार्थम् । *अग्निहोत्रेति । अग्निहोत्रं हूयते यया वैकङ्कतस्रुचा सोऽग्निहोत्रहवणी तस्या अग्निहोत्रहोमानन्तरं हुत्वाऽवशिष्टप्राशनार्थं जिह्वया लेहः कथञ्चिल्लीढायाः पुनर्ग्रहोऽग्निहोत्रसाधनत्वम् । *प्रायश्चित्तेति । कामकृते महापापादौ ।

न तस्य निष्कृतिर्दृष्टा भ्रूण्वग्निपतनादृते ।

इत्यादिना विहितस्य विधानमुपदेशः ।

मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ।

इति मनुवाक्यं त्वेतद्युगपरम् । अत्र मरणान्तिकं विदधातुः जातिवधप्रायश्चित्तं सूच्यते । तच्च मतिपूर्वनिर्देश एव अन्यापदेशेन

---

(१) 'हवण्याश्च' क० । (२) 'साक्षेपमघ' क० ।

*संसर्गदोषः 'तत्संसर्गी च पञ्चमः' इत्युक्तः । स्तेयं च तदन्यानि महापातकानि ब्रह्महत्यासुरापगुरुतल्पानि त्रीणि, तेषां कामकृतानां मरणान्तिकं प्रायश्चित्तं विप्राणां कलौ नेत्यर्थः । मरणान्तिके हि जातिवधनिमित्तं द्वादशाब्दद्विगुणं ब्रह्मवधनिमित्तं च द्विगुणं भवति तत् 'चतुर्थे नास्ति निष्कृतिः' इति निषिद्धम् । न चा*त्महत्याविधिना तद्बाधः, तेन ह्यात्महत्यानिमित्त-

---

पृष्टं प्रति निर्देशे तदनन्तरं पृच्छकेन तथाचरणे तु न दोष इत्येतदर्थं मतिपूर्वमित्युक्तम् । अत्र पाठान्तरं-संसर्गदोषस्तत्संसर्गी च पञ्चमः इत्युक्तः । स्तेयं च तदन्यानि महापातकानि ब्रह्महतनसुरापानगुरुतल्पगमनानि त्रीणि महापापानि, तेषां कामकृतानां विप्राणां प्रायश्चित्तं मरणान्तिकं कलौ नेत्यर्थः । मरणान्तिके हि जातिवधनिमित्तं द्वादशाब्दं द्विगुणं ब्रह्मवधनिमित्तं च द्विगुणं भवति । तत् 'चतुर्थे नास्ति निष्कृतिः' इति निषिद्धम् । न चात्महत्याविधिना तद्बाधः । तेन हि आत्महत्यानिमित्तस्यैव बाधो न जातिवधनिमित्तस्य । संसर्गिणस्तु कामतोऽपि व्रतस्यैवोक्तेर्न मरणान्तिकं, नापि स्तेये, तत्र राज्ञो वधकर्तृत्वात् । तेन तयोर्मरणान्तिकाभावात्तयोरेव निष्कृतिर्नान्येषां त्रयाणाम् । युगान्तरे (१)तु कलौ निषेधबलादेव प्रवृत्तिः । एतद्विप्रपरं न क्षत्रियादेः । तदुक्तं 'विप्राणां मरणान्तिकम्' इति । विशेषस्त्वस्मत्कृते प्रायश्चित्तरत्ने द्रष्टव्यः ।

अथैतद्व्याख्यायते-ननु 'प्रायश्चित्तविधानं च' इत्यनेन 'संसर्गदोषस्तेयान्य' इत्यस्य पौनरुक्त्यम्, इतरत्र मरणान्तिकाभावादित्यत्रैकदेशिमतमाह-*संसर्गेति । विधानं करणं क्रियमाणं प्रायश्चित्तमिति यावत् । तच्च महापापनिष्कृतिरित्येकं वाक्यम् । *आत्महत्याविधिना—

---

(१) 'तु' नास्ति घ० ङ० ।

स्यैव बाधो न जातिवधनिमित्त(१)स्य भिन्नविषयत्वात् । *संसर्गिणस्तु कामतोपि*व्रतस्यैवोक्तेर्न मरणान्तिकम् । नापि स्तेये त(२)त्र *राज्ञो वधकर्तृत्वात् । तेन तयोर्मरणान्तिकाभावात् तयोरेव निष्कृतिर्नान्येषां त्रयाणाम् । *युगान्तरे तु कलौ निषेधब(३)लात्प्रवृत्तिः । एतच्चिप्रपरं *न क्षत्रियादेः । तदुक्तम् 'विप्राणां मरणान्तिकम्' इति । *विशेषोऽस्मत्कृते प्रायश्चित्तरत्ने ज्ञेयः ।

यः कामतो नरः कुर्यान्महापापं कथञ्चन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥

इत्यात्महननविधिना । संसर्गदोषस्तेययोः पर्युदासबीजमाह—*संसर्गिणस्त्विति । *व्रतस्यैवेति ।

यो येन पतितेनैषां संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये ॥

इति मनूक्तेः । *राज्ञ इति ।

ब्राह्मणस्वर्णहारी तु राज्ञे मुसलमर्पयेत् ।
स्वकर्म ख्यापयंस्तेन हतो मुक्तोऽथवा शुचिः ॥

इति पाक्षिकमुक्त्यभिधानात् आत्महननाकरणाच्च । ननु मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ।

इति मनुनापि मरणान्तिकं निषिद्धमिति युगान्तरेऽपि न दुष्करमेवेत्यत्राह—*युगान्तरे त्विति । एकमूलकल्पनालाघवेन मानवस्यापि कलिपरत्वादिति भावः । *न क्षत्रियादेरिति । तथाच क्षत्रियादेर्मरणान्तिकं प्रायश्चित्तं क(४)लौ भवतीति भावः । ननु एतन्मते प्रायश्चित्तविधानं चेत्यस्य वैयर्थ्यं दुर्वारमित्यत्राह—*विशेषश्चेति । संसर्गदोषश्चेति वाक्यं पृथगेवेत्यभिप्रायः । त-

(१) 'निमित्तस्याभिन्न' ख० । (२) 'तेन' क० ।
(३) 'बलादेव' क० । (४) 'कलौ' नास्ति घ०ङ०

*वरातिथिपितृभ्यश्च पशूपाकरणक्रिया ।
*दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ॥
सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ।
अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियः ॥
परोद्देशात्मसंत्याग उद्दिष्टस्यापि वर्जनम् ।
प्रतिमाभ्यर्चनार्थाय संकल्पश्च सधर्मकः ॥

चाग्रे स्पष्टम् । वस्तुतस्तु

विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेत् ।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ।

इत्यत्र विधिपदवशात्प्रथममहापापानन्तरं प्रायश्चित्तं कृत्वा यदि द्वितीयं पापं क्रियते तदा तद्द्विगुणं प्रायश्चित्तं कार्यं, तदुत्तरं महापापे तु तत्त्रिगुणमिति, "प्रतिनिमित्तं नैमित्तिकावृत्तिः" इति न्यायोज्जीवनेनाभिधाय चतुर्थे महापापे प्रायश्चित्तनिषेधः, नतु प्रकृते अकृतप्रायश्चित्तस्य कथञ्चिच्चातुर्विध्ये तत्प्रवृत्तिरिति । अत्र 'चतुर्थे नास्ति निष्कृतिः' इत्येव विधायकम् । अतो न वाक्यभेद इत्येके । एतच्च व्रत एव प्रवर्त्तते न मरणान्तिके, बाधात् । एवञ्च तत्र द्वैगु(१)ण्यादिविध्यन्तरमावश्यकमिति परे । *वरेति । वरस्य प्राजापत्यः । अतिथेः "आग्नावैष्णव" इति पशुयागविधिः ।

वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥

इत्यादिपित्र्यपशुविधिः । अत्र श्राद्धे पशुयागाभावेन तद्धर्मानतिदेशादुपाकरणाप्राप्तेः पशूपाकरणशब्देन तत्प्रकृतिकं पितृभ्यो मांसपरिवेषणं ल(२)क्ष्यते । एवञ्च "मधुपर्के पशोर्वधः" "मांसदानं तथा श्राद्धे" इति च गतार्थम्, एकमूलकल्पनालाघवात् । एवञ्च 'यस्तु प्राणिवधं कृत्वा'इत्यादि बृहत्पाराशरमपि कलिपरमेव । *दत्तेति ।

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।

---

(१)'त्रैगुण्यादि' घ० ङ० (२) 'लक्ष्यते' नास्ति घ० ङ०

अस्थिसंचयनादूर्ध्वमङ्गस्पर्शनमेव च ।
*शामित्रं चैव विप्राणां*सोमविक्रयणं तथा ॥
षड्भक्तानशने चान्नहरणं हीनकर्मणः ॥

माधवीये पृथ्वीचन्द्रोदये च—

*शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् ।
भोज्यान्नता गृहस्थस्य*तीर्थसेवातिदूरतः ॥
*शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिशीलता ।
आपद्वृत्तिर्द्विजाग्र्याणाम*श्वस्तनिकता तथा ॥
*प्र(१)जार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः ।

इत्यादिद्वादशविधः पुत्रो विहितः तत्रौरसदत्तकव्यावर्त्तनाय दत्तौरसेतरेषामिति । *शामित्रमिति । 'आलभेत'इति विधिप्राप्तं यज्ञे पशुमारणम् । *सोमेति । "गवा क्रीणाति"इति विधिवशसिद्धं सोमविक्रयणम् । *शूद्रेष्विति ।

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥

इति विहितम् । न(२)चेदं स्नातकप्रकरणत्वात्तेषामेवेति वाच्यम् "उत्तरेषां चैतदविरोधि"इति गौतमेन गृहस्थादीनामपि तदतिदेशात् । अतश्च गृहस्थपदं नाहिताग्निपरं मानाभावात् । दासादिपदं च नापितकुम्भकारयोरुपलक्षणम् , अन्यथाऽनौचित्यापत्तेः । *तीर्थसेवेति । तीर्थयात्रेति पाठान्तरम् । 'दूरतस्तीर्थमासेव्यम्'इत्युक्तं तीर्थसेवनम् । *शिष्यस्येति ।

गुरुवत्प्रतिपूज्याश्च सवर्णा गुरुयोषितः ।

इत्युक्ता पादस्पर्शादिका । *अश्वस्तनिकतेति ।

व्यहैहिको वापि भवेदश्वस्तनिक एव वा ।

इति विहिता । *प्रजार्थं त्विति । क्वचिच्छाखायां जातक-

---

(१)'प्रजार्थं' इ० (२) 'नचैवं' इ०

*ब्राह्मणानां प्रवासित्वं मुखाग्निध्मनक्रिया ॥
*बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदितः ।
यतेश्च सर्ववर्णेषु भिक्षाचर्याविधानतः ॥
नवोदके दशाहं च दक्षिणा गुरुचोदिता ।
ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च ॥
*भृग्वग्निपतनैश्चैव वृद्धादिम(१)रणं तथा ।
*गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ॥
पितापुत्रविरोधेषु साक्षिणां दण्डकल्पनम् ।
यतेः सायंगृहत्वं च सूरिभिस्तत्त्वदर्शिभिः ॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्तितानि विद्वद्भिर्व्यवस्थापूर्वकं बुधैः ॥

र्महोमे प्रजाजीवनार्थमरणिपरिग्रहो विहितः । *ब्राह्मणानामिति । प्रवासित्वं वृथा सदा प्रवासशीलत्वम्, एवञ्च

प्रवसेत्कार्यवान् विप्रो न वृथैव चिरं वसेत् ।

इति कलिपरमेव । *बलात्कारेति ।

बलात्प्रमथ्य भुक्ता चेद्दह्यमानेन चेतसा ।
प्राजापत्येन शुद्धिः स्यात्तत्तस्याः पावनं स्मृतम् ॥

इति संवर्त्तोद्युक्तंप्राजापत्यादिना संग्रहः । यद्वा, म्लेच्छादिभिर्भुक्तायां अभुक्तायां अप्यतिचि(२)रकालं भुक्ततदीयान्नादिना केवलतत्तादात्म्यापन्नायाश्च संग्रहः । परन्तु एतादृशविषये तासां तादृशपुंसां च प्रायश्चित्तं कार्यं न तु सं(३)ग्रह इति संग्रहपदोपादानम् । *भृग्वग्नीति ।

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥

इति विहितः । णिजर्थविवक्षया हन्यादित्यर्थः । *गवीति । गोतृप्त्यधिके जले 'शुचि गोतृप्तिकृत्तोयम्' इति विहितम् ।

(१)'मरणे' ख० (२)'चिरतरकालं' घ०ङ० (३)'संग्रह इति' नास्ति घ०ङ०